
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2680

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
तुलसीमहात्म्य	दिनानाथ पाठक	पुराण	पुर्ण	-	5/12	18	संस्कृत	कागद	11	49		

पद्मपुराणान्तर्गतं तुलसी माहात्म्यम्:

म

तुलसी माहात्म्य

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः श्रीतुलस्यैनमः प्रणम्यनखनिर्भिन्नमहामोहासुरारये नमस्कुर्मोसुरांनसिं
ह्मायस्वप्रकाशचिदात्मने १ अज्ञानतिमिरांधस्यज्ञानांजनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः
२ सूतउवाच पुराकदाचिद्वृत्रारिःप्रणिपत्यबृहस्पतिं व्यजिज्ञपन्महाभागःसर्वज्ञंवसिनांवरं ३ भगवन्प्राणि
नः सर्वेत्रैलोक्यशाधिपेममदुर्वृत्तादुःखसंपन्नाःसदाचारविवर्जिताः ४ संसारसागरेमग्नाःसंकीर्णवरजातयः
जातिभ्रष्टाःप्रवर्तंतेहीनाचाराश्चहिंसकाः ५ मोक्षमार्गस्त्विलीनस्तुधर्मोप्याचविनाशितः संपदश्चविनश्यंति
क्षणमात्रेणतेगुरो ६ पुरुषाधाभविष्यंतिकेनोपायेनसुव्रत ब्रूहितत्वंविदांश्रेष्ठसर्वसंपत्समृद्धिदं ७ बृह
स्पतिरुवाच साधुपृष्टंमहाभागत्रैलोक्यैश्वर्यवर्द्धनं माहात्म्यंतुलसीदेव्यागुणाःसर्वेत्वयोदिताः ८
सिध्यंतिनात्रसंदेहसालक्ष्मीःसर्वसिद्धिदा येनैववर्द्धितादेवीसलक्ष्मीभाजनंभवेत् ९ यत्रतिष्ठतिसादेवी
तत्रैवायांतिसंपदः तस्याःप्रभावंदेवशकल्पकोटिशतैरपि १० वक्तुंनालंमनोवक्षेसंक्षेपात्पाकशासन हि
रण्यकशिपोःपुत्रप्रल्हादोभक्तसत्तमः ११ नरकायजगादेवंतुलसीकाष्टवैभवं प्रल्हादउवाच वक्ष्येतुल
स्यामाहात्म्यंशृणुनत्कजमापुमान् १२ भक्तोवंछितान्भोगानंतेमोक्षमवाप्नुयात् १३ आस्तेहितुलसीक

ध्रंमुष्टिमात्रंधरात्मज सान्निध्यंकुरुतेतत्रदेवोनारायणस्स्वयः १४ तुलसीकाष्टमाहात्म्यंश्रवणात्पठनादपि इयत्तयापरिछिद्यमया
वक्तुंनशक्यते १५ तदिदंतुलसीकाष्टमाहात्म्यंवक्ष्यतेधुना शृणुपुत्रपवित्रंयछ्रुत्वाघेभ्योविमोक्ष्यसे १६ पत्रंपुष्पंफलंतोयंमूलंशा
खार्चनादिषु तुलसीपालनंसत्यंपावनंपरमार्थदं १७ शरीरंदह्यतेयेषांतुलसीकाष्टवन्हिना ध्वस्तातुतुलसीकाष्टंसर्वांगेषु
२ मृतोभवेत् १८ नरोयत्कुरुतेपापंतस्मात्पापात्प्रमुच्यते तीर्थयदिनसंप्राप्तंस्मरणंकीर्तनंभवेत् १९ पलायंतेहिपापानिसि
हत्रस्ताइवद्विपाः तुलसीकाष्टदग्धस्यनरस्यनपुनर्जनिः २० तुलसीकाष्टदग्धंतिप्राशोतिपरमच्युतं यद्येकंतुलसीकाष्टंमध्ये २
काष्टशतैःकृतं २१ दाहकालेभवेन्मुक्तिःपापकोटियुतेरपि गंगातोयेनमिश्राणियांतितोयानिपुण्यतां २२ तुलसीकाष्टमिश्री
तयाग्निस्यज्वलतेनतुः दह्यंतेतस्यपापानिपक्षमात्रंदिवौकसा २३ ज्वलतेयत्रदैत्येंद्रतुलसीकाष्टपावकः होमंकुर्वंती
येतस्मिंस्तुलसीकाष्टपावके २४ हुतेनतेनहोमेनत्स्वग्निष्टोमफलंभवेत् योददातिहरेर्धूपंतुलसीकाष्टपावके २५
शतक्रतुसमंपुण्यंगोसहस्त्रफलंभवेत् नैवेद्यंपच्यतेयस्तुतुलसीकाष्टवन्हिना २६ मेरुतुल्यंभवद्दत्तंतदन्नंकेश
वस्यवै तुलसीपावकेनैवदीपंचकुरुतेनरः २७ दीपदानायुतस्येवपुण्यंभवतिनिस्संशयः यःप्रयछतिकृष्णा
यतुलसीकाष्टचंदनं २८ गोदानशतजंपुण्यंभवेत्तस्यनसंशयः तुलसीमृत्तिकालिप्तांगःकुरुतेविष्णुपूजनं २९
प्रजाफलंदिनेसोथलभतेवार्षिकंहरेः विलेपनार्थंकृष्णस्यतुलसीकाष्टखंडिकां ३० मर्दनेतिष्ठलेयावत्ता
वत्तस्यफलंश्रृणु तिलप्रस्थशतंदत्वायत्फलंवेदवेदिने तत्फलंजायतेपुंसांप्रसादाच्चक्रपाणिनः ३१
योददातिपितॄणांचतुलसीकाष्टचंदनं पितॄणांचभवेत्तृप्तिःश्राद्धंचाष्टशताधिकं ३२ तुलसीगंधमाघ्रायपितरस्तुष्टमानसाः

प्रयाति गरुडारूढस्तत्सदं चक्रपाणिनः ३३ तुलसीकाष्ठवह्नौ तु पार्वणं क्रीयते यदि सहस्रवार्षिकी प्रीतिं पितॄणामाव
हेत्सदा ३४ तुलसीकाष्ठगंधैस्तु लेपयित्वा निमंत्रितान्॥ भोजयेत्तुलसीपत्रपवित्रैः परमान्नकैः ३५ तृप्यंति पि
तरस्तस्य कल्पकोटिशताधिकं भक्त्या तु तुलसीगंधैः शालिग्रामशिलार्चनं ३६ पवित्रतीर्थसंमिश्रं प्रतिमामर्चयेद्बुधः
दिने दिनेश्वमेधस्य फलमक्षय्यमश्नुते ३७ पात्राभावस्थिते म्लेच्छे विप्रे वा परदारके पंचपातकसंयुक्ते सदाचारविवर्जि
ते ३८ श्वपचे म्लेच्छसेवाकितवे पिशुने द्विजे कृतघ्ने नास्तिके चापि शूद्रीसंगमलोलुपे ३९ भोज्यते तुलसीमिश्रैर्नै
वेद्यान्नैः सुतीर्थकैः नारायणमवाप्नोति परमद्वैतमव्ययं ४० रामं कृष्णं हयग्रीवं वामनं वा विशेषतः विधाय तुल
सीकाष्ठैः प्रतिमां रूपकल्पितां ४१ सीतां भूमिं महालक्ष्मीं तुलसीं भुवनेश्वरीं दुर्गां वा देवतास्वापि तुलसीकाष्ठ
निर्मिताः ४२ अर्चिते तु फलं वक्तुं न जानीते परः पुमान् धृतं तु तुलसीगंधं शालग्रामार्चितं शुभं ४३ जप्ते जपमनं
तस्याश्वमेधस्तु रगमेधसः धृते तु तुलसीगंधे श्रीपते विनियोजिते ४४ जपपूजादिकं सर्वमनंतफलदं भवेत् कृत्वा
क्षवलयं काष्ठैस्तुलस्या गणनाज्जपः ४५ अनंतफलमाप्नोति कंठमालां च धारयेत् यज्ञसूत्रे च कंठे च कर्णे शि
रसि वाध्वेन ४६ दिने दिनेश्वमेधस्य सहस्रफलमश्नुते यत्कंठलग्ने सततं तुलसीकाष्ठसंभवं ४७ स नरः पूज्यते
देवैः संपदायास्पदं भवेत् अयने विषुवे चैव ग्रहणे पंचपर्वसु ४८ दुःस्वप्ने श्राद्धकाले च कारायद्रनिपीडिते अं
तकाले जपेदेतद्वक्ष्यमाणेन वोत्तमः ४९ स याति परमं धाम पुनरावृत्तिदुर्लभं ५० इति श्रीपद्मपुराणे तुलसीमा
हात्म्ये प्रथमोध्यायः १ ५० प्रह्लाद उवाच भूयस्तुलस्याः कृष्णाचमासमाहात्म्यमेवच वक्ष्ये संक्षेपतः सर्वं शृणु देवेश्वर १

आषाढमासे शुक्लायां एकादश्यां व्रती नरः सहस्रदलसंयुक्तं तुलसीदामपूजनात् २ बिल्वपत्रार्चनाद्वापि केशवस्य प्रसादतः दारिद्र्य
नाशनं धर्मं यशो विद्यामवाप्नुयात् ३ द्वादश्यां कार्तिके मासि सहस्रैस्तुलसीदलैः बिल्वपत्रसहस्रैर्वा हरेः पूजा विमुक्तिदा ४ शु
भे वारे तिथौ दत्वा सहस्रं तुलसीदलं भाद्रशुक्लचतुर्दश्यामर्चयेत्पुरुषोत्तमं ५ अनंताय नमः इति बिल्वैर्दूर्वासहस्रकैः आणिमा
 दिगुणान् प्राप्य नक्षत्रस्थानमाप्नुयात् ६ जयंती रामनवमी विजयादशमी तथा पौर्णिमासि तु वैशाखी ज्येष्ठे शुक्ला तु पंचमी ७ २
इषशुक्लाच नवमी कार्तिके कृत्तिकायुता मार्गशीर्षे च सा काले संक्रांत्यां मकरे रवे ८ एते कालाः महापुण्याः तथा मन्वादयोपि
च पूजयेद्देवं गोविंदं बिल्वैश्च तुलसीदलैः ९ शतपत्रैश्च दूर्वाभिः कृती नित्यमतंद्रितः तुलसीपत्रसंयुक्तैर्मंजरीभिः सहस्र
कैः १० एतत्पुण्यफलं वक्तुं ब्रह्मकल्पेन पार्यते किंच विष्णोः पदं प्राप्य पुनर्जन्म न विद्यते ११ एकादश्यामहोरात्रं निराहारो भवेत्स
दा विष्णुमाराध्य तां तीर्थं पिबेच्च तुलसीयुतं १२ विष्णोः प्रसादतुलसीतीर्थं वापि द्विजोत्तमाः उपवासदिने प्राश्य प्राश्नीयाद्धविचा
रयत् १३ उपवासदिने यस्तु तीर्थं वा तुलसीदलं न प्राश्नीयाद्विमूढात्मा रौरवं नरकं व्रजेत् १४ तुलसीतीर्थरहिता [illegible] लना
एकादशी नरैः हन्यते सा न फलदा तान्नरश्च सिकेशवः १५ तुलसीसेवनाद्देवदेहार्द्धं शूलपाणिनः अवापि गौरी जाह्नुगारक्ष
साड्न्यने क्षमा १६ तथाह्यरुंधती देवी साध्वी ऋषिपुरस्कृता सेवनात्तुलसीदेव्या रुक्मिणी ईश वल्लभा १७ प्राप्य संजीवि
नीं विद्यां तुलसीसेवया कविः सेवया तुलसीदेव्याः गीष्पतित्वं च गीष्पतिः १८ तताऽर मारुतिः सिंधुं शोषोऽस्य धरणीधरः तुल
सीसेवया रामो रावणं हतवान् सुरा १९ तुलसीपूजनाद्देवहेरंबो विजितेंद्रियः गजासुरं निहत्याजौ विघ्नेशत्वमवाप्नुयात् २०

तुलसीसेवयाचैवषण्मुखोविजितेंद्रियः तारकंसमरेहत्वादेवसेनाधिपोभवत् २१ तुलसीसेवनाद्देवीवीरभद्रोमहाबलः
जघानचासुरान्घोरान्दक्षंचाध्वरेध्वरे २२ अतश्चतुलसीपूज्याविशेषेणहरेर्दिने उपगीतंपुराणेनहरिणादेवसंनिधौ २३
पुत्रयागांदहनेससामर्थ्यमवाप्नुयात् शिवस्तुपूजयापश्चात्सहसाहतुरत्रयं २४ तुलसीपूजयाब्रह्मन्शेषोनागाधिपःस्वयं
निक्षिप्यभुवनंमूर्ध्नासहमामथधारयत् २५ तुलसीसेवनाद्देवपक्षिराजोमहाबलः विष्णुवाहनतांप्राप्तोजहारामृतमुत्तमं २६
आराध्यनंदीदेवेशंशंभोराराधनेक्षमः बलवंतश्चदिङ्नागातुलसीसेवयाभवन् २७ तथैवभूमिधरणेपरियासेःसु
रायुषः तुलसीसेवयादेविश्चाविंत्रोऽभुमंगला २८ पातिव्रत्यमवाप्यासोमर्त्येसंजीवनेक्षमा तुलसीसेवनाद्दे
वीवाग्देवीकामदायिनी २९ सर्वविद्यानिधिर्जाताअत्रपतित्वमापसा दुर्गादेवीमहाभागातुलसीपरिचर्यया ३०
महिषंरक्तबीजंचशुंभंचापितथावधीत् मृकंडुस्तुतुलसीमत्र्यमार्कंडेयमवाप्तवान् ३१ सर्वेषामपिजंतूनां
ऋषीणांयोगिनामपि पतिव्रतानांनारीणांसाप्रजाकर्मसिद्धये ३२ रंभाचाप्सरसांमध्येतुलसीसेवयापुरादे
वेंद्रंसंवरंलब्ध्वादेवेंद्रप्रियतामगात् ३३ अतश्चतुलसीपूजाविशेषेणहरेर्दिने संक्रमेषुचतुर्दश्यांद्वादश्यांपात
पर्वसु ३४ स तुलसीनहरेस्संध्याभंगंगारापराफलेके तुलसीयेनिस्लंतंलितेहलंतंनिशिरोहरेः ३६ प्रनाते
तुलसीतीर्थप्राश्नंत्यश्चस्त्रियःपुमानरे पत्रमेकंअसहत्यासममाकुर्मनीषिणः ३७ पाराशाःस्वर्णपुष्पंचतुलु
सीबिल्वमेवच अर्चयंतिसदादेवान्प्रक्षाल्यैवपुनःपुनः ३८ सहस्रस्यच्चर्यगोबिंदंबिल्वपत्रेणमानवः सयाति
विष्णुसायुज्यंनात्रकार्याविचारणा ३९ पुष्यमासेविशेषेणशुक्लपक्षेत्रयोदिने यःपूजयेत्साष्ट्रामैस्तुलसीमुपचारकैः ४०

[illegible]

तस्य सा वांछितफलं प्रयच्छति न संशयः द्वादश्यां माघमासे तु शुक्लायां पूजयेत्सुधीः ४१ अश्वमेधफलं तस्य ददाति तुलसी
शुभा अर्द्धोदिते रवौ माघे स्नायाद्यान्मूलमस्तलया ४२ कुलत्रयसमुद्धृत्य विष्णुलोके महीयते राकायां फाल्गुणे मासि हरेर्वा द्वा
दशीदिने ४३ रात्रौ दीपप्रदानाच्च परमान्नसमर्पणात् जन्ममृत्युजराहीनो मोक्षमार्गं च विंदति ४४ चैत्रे विषुवकाले वा राका
यामपि यत्नतः पायसान्नप्रदानेन परमां सिद्धिमाप्नुयात् ४५ शुक्लात्तृतीया वैशाखे साक्षयाख्या परिकीर्तिता तस्यां च पौ
र्णिमास्यां च दध्यन्नस्यान्निषेवनात् ४६ पावनं लोकमासाद्य तत्रैव परिपूजयेत् ज्येष्ठमासी च द्वे वशी दशम्यामपि दिने
त्रयं ४७ तोषयित्वा यवान्नेन विष्णुवल्लभतामियात् आषाढ्यां दशमीशुक्ला माषाढी दानवेश्वर ४८ आकार्तिकं प्रकुर्वी
त शीरपूजादिकां यकं एकैकस्याः फलेनैव पुत्रपौत्रादिसंपदः ४९ धनधान्यसमृद्धिं च राज्यं बहुसमृद्धिदं एता
नवाप्य सुचिरं मोक्षं प्राप्नोत्यनुत्तमं ५० शयने परिवर्तने च समुत्थाने च चक्रिणः विशेषात्पूजनीये वी सा लोक्याद
फलप्रदा ५१ जयंसामद्रिरात्रे तु तुलस्याः पूजयानघा वंध्या च लभते पुत्रं केशवस्य प्रसादतः ५२ तथा भाद्र
पदे मासि गजच्छायासमाह्वये तुलसीदलमिश्रेण नैवेद्येन च चक्रिणः ५३ भोजयेच्च पितृन्भक्त्या विधिना पार्वणे
न तु सहस्रवार्षिकीं तृप्तिं पितरो यांति नान्यथा ५४ तन्मासपूर्णिमायां वा भक्त्या वा हरिवासरे निवेद्य वै व्यामाषा
न्नं यमलोकं न पश्यति ५५ महानवम्यां संपूज्य तुलसीघृतपायसैः पुरं श्रीभोजयेद्दत्तो वंध्या पुत्रमवाप्नुयात् ५६
दीपमारोपयेत्सायं कार्त्तिके प्रतिवासरं । निवेद्य पायसान्नं च सिद्धिमीप्सितमवाप्नुयात् ५७ कार्त्तिक्यां पौर्ण
मास्यां च माहादीपं समाचरेत् स्नानं विभ्रंश्वलं प्राप्य विष्णुसेवाधिको भवेत् ॥ ५८ विष्णोरुत्थानदिवसे जा

गरित्वा निशां व्रती घनमुद्गुडक्षीरमिश्रान्नैः भुनियामके ५९ यथा कर्मं भ्रजयित्वा कुलकोटिसमन्वितः चरि
त्वा स वै लोकेषु विष्णुसायुज्यमाप्नुयात् ६० यापस्ये पद्मिनीनाथे भक्ष्यत्रयनो नरः निवेद्य रवये मुक्तानं सर्वलो
काधिपो भवेत् ६१ तथा मकरसंक्रान्तौ तन्मासे पौर्णिमादिने अमायां समाराध्य प्रासे च हरिवासरे ६२ उ
पोष्य जागरं कृत्वा प्राणा नैवेद्यदानतः विष्णुसायुज्यमाप्नोति नात्र कार्या विचारणा ६३ उक्तेषु मासेष्वेकमासे
पूजाकरश्च यः सर्वभोगान्भुक्त्वा मुक्तिहेतुं प्राप्तमेव च प्रपद्यते ६४ एवं द्वादशमासाद्यैः पूजां नारी नरोऽपि वा करोति
तत्फलं वक्तुं विष्णुनापि न शक्यते ६५ इति श्रीपद्मपुराणे तुलसीमाहात्म्ये द्वितीयोऽध्यायः २ ७ ब्रह्मोवाच
श्रूयतां वत्स भक्त्यापि पूजामाहात्म्यमुत्तमं रंगावलिं पुरो न्यस्य दीपान्ज्वाल्य दिने दिने १ प्रदक्षिणं ततः कृत्वा नमस्कारं
दिने तथा धूपदीपैश्च नैवेद्यैः स्तोत्रैश्च विशेषतः २ पूजयेत्पुत्रकामो नां वत्सरानुनेयं तल भेर क्षीरेण चक्र दलैश्च नारिकेलरसैर्वि
वा ३ वर्द्धयेद्वत्सरं देवी विनिघ्नं च पायसं अनया शुजया देवी तोषिता सर्वसिद्धिदा ४ दद्यात्पुत्रं वंध्यायाः साम्राज्याधिपतिं
सुतं भोजयेत्तुलसीश्रीः सेपरमात्मेन वर्णितं ५ वत्सरं भार्गवे वारे वंध्या पुत्रमवाप्नुयात् पुत्रलेकथयिष्यामि कथां पापप्रणाशिनीं ६
पुरा दशरथः श्रीमान् अयोध्याधिपतिः प्रभुः सर्वलक्षणसंपन्नः समरेष्वनिवर्तकः ७ सूर्यवंशसमुद्भूतः भद्रबुद्धिर्जितेंद्रियः
षष्टिवर्षसहस्राणि शशास वसुधातलं ८ अद्वैतोऽकेशवे भक्तिरस्य तस्य महीपतेः केशवाराधनं ही त्वानान्यद्देवकेशाच्चन ९
एवं स्थितस्य भक्तिन धारानिगणस्य च अभावात्मजः स्यात्तः चिंताजाता महत्तरा १० एकदा स तु कौशल्यां प्रधानमहिषीं नृपः ॥

अंतःपुरे समागत्य चिंतयामास दुःखितः ११ षष्टिवर्षसहस्राणि गतानि मम शोभने अरातिमर्दनि पदं न्यस्तं देवि म
४ या बलात् १२ संपदो निखिलाः प्राप्ताः संमता सिवकामम निर्विष्टविषयाः सर्वे राज्यं निहतकंटकं १३ अपवादं मया
किंचिद्देवी लोके न विद्यते तथापि पुत्रहीनस्य मम सम्यङ् न शोभते १४ चक्षुष्मानपि सोंधस्याद्यदि पुत्रं न लोकये
त् बधिरः सोपि यः पाति न पुत्रस्य वरं भृतं १५ बहुसधनयुक्तोपि पुत्रहीनो ह्यसाधनः पुत्रहीनस्य मे सुभ्रूः संपदो न हि ४
शोभनाः १६ अंधकारमयान्लोकान्व्रजामि सुतवर्जितः किं करोमि क्व गच्छामि कुलं निष्फलं भविष्यति १७ इति चिं
तासमाविष्टं राजानं प्राह भामिनी कौसल्योवाच अलं चिंताभिरेताभिरंतःशोषणहेतुभिः १८ देहे तु चिंता देहस्थ
आसनां वसुधाधिप चिंताग्निर्विष्टमनसां जंतूनां वै सुखं कुतः १९ आराधयामो गोविंदं वांछितार्थस्य सिद्धये त
स्य प्रजाफलं तस्य राजन्पुत्रमित्राणि बांधवाः २० आराधितो जगद्धाता निर्वाणमपि यच्छति किं नु पुत्रादिसंपत्ति
मिह लोके सुखप्रदां २१ इति तस्य वचः श्रुत्वा श्रीमान्राजा महारथः निरंतरं तया सार्द्धं हरिं वत्सरमर्चयेत् २२
एकदा नरपालस्य तस्या देव्याः सुदारयोः स्वप्ने प्रत्यक्षतां प्राप्तः शंखचक्रगदाधरः २३ पीतांबरधरो धरः स्रग्वी
हारकौस्तुभभूषणः ततो राजश्च देव्यश्च स्मितपूर्वमुवाच सः २४ श्रीभगवानुवाच तुष्टोस्मि पूजया सम्यक्
भ्याभ्यां भक्तियुक्तया वरं दद्मि मत्तो वां वृणीष्व जगतीपते २५ राजोवाच यदि प्रसन्नो भगवान्वरयोग्यावयं
यदि भवतः सदृशं पुत्रं प्रयच्छ भगवन्मम २६ श्रीभगवानुवाच मत्समः सर्वभूतेषु नहि राजन्यसत्तम अ
हमेवात्मजत्वं ते प्राप्स्यामि जगतीपते २७ मन्नेत्रांबुसमुद्भूतां स्मृतां लोकपूजितां मम प्रियाय हि भवानर्चयेत्तुलसीं शुभां २८

पायसेक्षुरसेनापिनारिकेलोदकेन च वर्द्धयस्वाब्दपर्यंतं नैवेद्यैश्च निरंतरं २९ पायसैर्मोदकैर्भक्ष्यैर्घृतदीपैः सदृशकैः ।
पूजयस्व जगद्धात्रीं सद्वारैश्च विशेषतः ३० तुष्टाहं पूजया त्वत्तः स्यां भविष्यामि वै वात्मजः इति दत्वा वरं ताभ्यां तत्रैवांतरधीयत ३१
उत्थाय देवी राजापि स्वप्ने दृष्टं महाद्भुतं मंत्रिभ्यः कथयित्वा तु स्फूर्तार्थे लोकपावनं ३२ तुलसीं पूजयामास सस्त्रीकोऽयत
मानसः अंगणे मंडपं कृत्वा हि वेदीं कृत्वा विधानतः ३३ संस्थाप्य तत्र तुलसीं हीरादिभिरवर्द्धयेत कौशल्या राजमहिषी तु
लस्यार्चनतत्परा ३४ रंगावल्यां विधानाद्यैर्ध्वजचामरदर्पणैः विविधैरुपचारैश्च तथा ब्राह्मणभोजनैः ३५ तुलसी
स्तोत्रजाप्यैश्च तथा मंत्रजपैः परैः सहराज्ञा वत्सरां तं पूजयामास भक्तितः ३६ तयोः पूजाविशेषेण तुष्टा सा दहरि
वल्लभा अत्यक्षमगमत्ताभ्यां पीतांबरधरांबरा ३७ पद्माननाच वरदाभयहस्ता चतुर्भुजा श्यामा विशालनयनानी
लकुंचितशिरोजा ३८ स्फुरत्कुंडलकर्णाभ्यां चंद्रचंद्रनिभानना मंजुश्रीदाममंजीरा मेखलादामशोभिता ३९ शु
क्लवस्त्रोत्तरीयासां दिव्यगंधानुलेपनं उमादेव्या सरस्वत्या दक्षिणे पार्श्वके स्थिता ४० अप्सरोभिरेकाभिः से
व्यमाना समंततः तां लोकमातरं दृष्ट्वा तुष्टाव वसुधाधिपः ४१ दशरथ उवाच जगद्धात्री नमस्तुभ्यं विष्णोस्त्वं प्रिय
वल्लभा ये च ब्रह्मादयो देवाः सृष्टिस्थित्यंतकारिणः ४२ त्वत्प्रसादं पूजायुक्ता नांदुर्लभिकं सुरेश्वरी यस्मै प्रसन्ना त्वं
देवी सः श्लाघ्यो जगतीश्वरे ४३ त्वत्प्रसादेन पुत्रस्येष्ट गुरुरखमार्य लोकयाम्यहं अयच्छ मह्यं तनयं वरदाभयसुव्रते ४४ ॥

श्रीतुलस्युवाच वरदाहंत्वसम्यास्मिव्रजयातवभूपते काष्ठैःशुष्कैर्मनोदारैःपुत्रियामिष्टिमाहर ४५ पायसैर्विष्णुमु
द्दिश्यभोजयेद्ब्रह्मचारिणः तेनप्रीतोमहाविष्णुःस्वयंपुत्रत्वमेष्यति ४६ आगामिचैत्रमासांतस्थंतत्पुत्रोभवष्यति ५
५ इतिदत्वावरंदेवीतत्रैवांतरधीयत ४७ सोपिराजामुदायुक्तःपायसैर्ब्रह्मचारिणः भोजयित्वाविधानेनयाजयि
त्वाचमातरं ४८ आहतैस्तुलसीकाष्ठैःपुत्रिकामिष्टिमाहरत् लेभेचचतुरःपुत्रान्साक्षान्नारायणात्मकान् ४९
रामंभरतमोजस्वीलक्ष्मणंलक्षणान्वितं शत्रुघ्नमपिशत्रुघ्नंसुनाम्नाजामाहाबलः ५० तुलस्याःसकलाच्च्भो
गानंतेविष्णुपदंययौ माहात्म्यंतुलसीदेव्याभस्यायःपठेन्नरः ५१ विषुवायनकालेपिपुण्यकालेषुवाशुचिः
आमायामुपरागेचश्राद्धकालेविशेषतः ५२ जयंत्यांशिवरात्र्यांचद्वादश्यांहरिवासरे माहानवम्यांश्रीरा
मनवम्यामपिसर्वदा ५३ अन्येषुव्रतकालेषुशैवशाक्त्याव्रतेषुच तदनंतफलंदेव्याप्रसादादिहजायते ५४
सस्फुत्रदमपुत्राणामधनानांधनप्रदं स्त्रीपुत्रदारकामानामुद्विधानांचविास्त्रदं ५५ क्षत्रियाणांजयप्रदंवि
शांवाणिज्यवर्द्धनं द्विजानांचविशेषेणज्ञानसिद्धिप्रदायकं ५६ भक्तिप्रदंचभक्तानांस्त्रीणांसौभाग्यवर्द्धनं
एतत्स्तोत्रंपठेद्देव्यातुलस्याःसंनिधानतः ५७ आयुरारोग्यमैश्वर्यंलब्ध्वांतेतत्पदंव्रजेत् ५७॥ इतिश्रीप
द्मपुराणेतुलसीमाहात्म्येत्रितीयोध्यायः ३ ७ सूतउवाच प्रातरुत्थाययोमर्त्त्येमुकुंदमुकुंदरदारधीः
तुलसीकीर्तयेद्धन्यातस्यपुण्यंविवर्द्धते १ पुरागीतंपुराणेषुपुंडरीकेनधीमता स्तोत्रंतुलस्याःपापघ्नंतन्निबोध
महामते २ नमोस्तुतुलसीकल्याणीनमोविष्णुप्रियेशुभे नमोमोक्षप्रदेदेविनमःसंपत्प्रदायके ३

तुलसीपातुमांनित्यंसर्वापद्भ्योपिसर्वदा कीर्त्तितापिस्मृतावापिपापोपियातिमानवं ४ नमामितुलसींदेवींतुल
सींविलसत्तनुं यांदृष्ट्वापापिनोप्यन्येमुच्यंतेसर्वकिल्बिषात् ५ तुलस्यारक्षितेसर्वंजगदेतच्चराचरं यावेहर
तिपापानिदृष्ट्वावेपापिनांनृणां ६ नमंतिसततंभक्त्यायस्यैबध्वांजलिंकलौ कलयंतिसुखंसर्वेस्त्रियोवैश्यास्त
थापरे ७ तुलस्यानंतरंकिंचिद्दैवतंजगतीतले यस्याःसान्निध्यमात्रेणपवित्रंसकलंभवेत् ८ तुलसीपल्ल
वंविष्णोःशिरस्याधायवैकलौ सर्वाणितेनश्रेयांसिध्दतान्येवनसंशयः ९ तुलस्यांसकलादेवावसंतिसततं
यतः अतस्तामर्चयेल्लोकेसर्वान्देवान्समर्चति १० नमस्तुलसिसर्वज्ञेपुरुषोत्तमवल्लभे पाहिमांसर्वपापे
भ्यःसर्वसंपत्प्रदायके ११ इतिस्तोत्रंपुरागीतंपुंडरीकेनधीमता विष्णुमर्चयतानित्यंशोभनैस्तुलसीदलैः १२
इममार्षस्तवंनित्यंपुराणंहरिवल्लभं यःपठेत्सततंभक्त्यासभवेद्विष्णुवल्लभः ॥ १३ इदंपठन्स्तवंनित्यंतुल
सीदलमुद्धरन् अर्चयित्वाहरिंभक्त्याप्राप्नुयात्परमंपदं १४ तुलसीश्रीर्महालक्ष्मीर्लक्ष्मीर्विद्यायशस्विनी
धर्म्याधर्माननादेवीदेवदेवमनःप्रिया १५ लक्ष्मीःप्रियासखीसुरद्युर्भूमिरचलाचला षोडशैतानिनामा
नितुलस्याःकीर्तयन्नरः १६ लभतेसुतरांभक्तिमंतेविष्णुपदंव्रजेत् तुलसीकाष्ठरचितांमालांयोधारयेद्यदि १७
भ सनरःप्रत्यलेवैकुंठंपदमव्ययं तुलसीश्रीर्महादेवीपद्मिनीश्रीर्हरिप्रिया १८ तुलस्याश्चैवपत्राद्यैःसुश्रेतां
चैवमालिकां योनित्यंधारयेद्देहेलक्ष्मीश्रीर्यंचविंदति १९ तुलसीस्थानमाश्रित्यमणिमालासमन्वितः
जपन्नष्टाक्षरंमंत्रंसर्वपापैःप्रमुच्यते २० वाराहींचरमांभूमिंगौरींदुर्गांसरस्वतीं गायत्रींवाप्यघोरांचवैष्णवींचैवेष्णवं २१

तथासर्वाणियंत्राणियोजयेत्प्रयतःशुचिः बहुसंवत्सरंप्राप्यफलंमासेनविंदति २२ तुलसीमूलमाश्रित्यवातोयत्र
त प्रवर्तते तद्देशवासिनांमुक्तिःकिमुतगृहवासिनां २३ तुलसीवायुसंस्पृष्टःपापकर्मापिमानवः विष्णुसायुज्यमा
६ प्नोतिनात्रकार्याविचारणा २४ अथतेकथयिष्यामिइतिहासंपुरातनं कश्चिदासीद्वनेलुब्धविप्रोह्येकोवनलुब्धकः २५
दिनेदिनेमृगशतंहतवान्मृगजीवनः अस्त्रस्वहस्तेनचक्रेबहुपातकसत्वरः २६ पथांयानांचमार्गस्थपथिका ना° ६
नांलुंठयन् धनंजहारविप्राणांशौर्येणसवनेचरः २७ गावस्त्रियश्चपापेनहतास्तेनदुरात्मना पिशितान्यन्यत्र
स्थानिसदाभक्षयतेधमः २८ चांडालींविधवांगेहेगृहीणांचाप्यरीरमत् तावत्सलुब्धकीयाहीनाब्राह्मीबहुविक्र
यी २९ एवंघोरेणरूपेणलुब्धकेनदुरात्मना अधिष्ठितेहिविषयेनववर्षपुरंदरः ३० द्वादशाब्देतदातत्रशुष्का
जाताजलाशयाः निरन्नेनतदाकालेप्रजाःसंक्षयमाययुः ३१ सकदाचिद्वनंगत्वात्वरण्येह्यपिइतस्ततः किंचित्स
त्वंनाससादमृगजीवीवनेचरः ३२ क्षुधासमस्तुपरिभ्रांतोगृहमागत्यनिर्घृणः निरन्नंमांसरहितंदृष्ट्वास्वपितरं
तथा ३३ व्यापाद्यद्रुतंतन्मांसंभक्षयामासनिष्ठुरः अन्येद्युर्मातरंपत्नींकन्यांपुत्रादिकांस्तथा ३४ मार्गमा
वृत्यपांथीकोघातयित्वाबुभुक्षितः निर्जनंतच्चविषमंमकरोद्बहुधावनं ३५ चिरंभसंपक्षिरहितंमसत्वंपापलिप्स
यः सकदाचित्सगिरिभ्राम्यन्नन्योसीत्समभासत ३६ तेनव्यापादितास्सर्वेगतासुःसमपद्यत यमदूतास्तदा
पाशैर्घातयंतोमुहुर्मुहुः ३७ आनयुस्तंयमस्यांतंचित्रगुप्तसमन्वितं निवेदयन्यमस्यापिचित्रगुप्तमपृच्छत ३८
यमउवाच किमनेनकृतंकर्मचित्रगुप्तविचारय भुक्तंतुतत्फलंसर्वंभुंक्तेवायदिवेतरं ३९ चित्रगुप्तउवाच

धर्मराजविजानीहिआजन्ममरणादयं कृतवानल्पमपिच स्वप्नेपिसुकृतंमनाक् ४० पापमेवकृतंकर्म
कल्पकोटिशतैरपि ४१ नमुच्यतेसौनिरयाद्युगजन्मशतादपि ४१ तस्मादसौमहाघोरान्नरकाननु
तिष्ठतु यातनान्दारुणाःसर्वान्भुंजानःसततंभ्रमो ४२ ततःप्रेतादिविविधान्नानायोपनीनुगमिष्यति
स्थावरादिषुसर्वेषुभुंजानःस्वकृतंसदा ४३ यमोदूतान्समाहूयक्रूरंरूपंप्रदर्शयत् उवाचचमहातेजाः
शृणुतेदंवचोमम ४४ एवंपापंसमाचरन्नरकेषुममाज्ञया पालयंतुक्रमेणाशुकुंभीपाकादिषुद्रुतं ४५
ततश्चसूकरादीनांयोनिंप्राप्यत्यसौचिरात् प्रह्लादोवाच तच्छ्रुत्वायमदूतास्तेयमशासनकारकाः ४६
नरकेषुचतंक्षिप्यछिंधिभिंधीतिवादिनः श्रोतातेभगवान्विष्णुःसर्वज्ञोजगदीश्वरः ४७ स्वगणान्प्रेषया
मासमहाकारुणिकःप्रभुः दूताःशृणुतमद्वचःपौंड्रकोनामलुब्धकः ४८ यमदूतैर्नियतेसौपापात्यमा
नेपिदारुणैः रौरवादिषुघोरेषुनरकेषुचनिष्ठुरान् ४९ मोचयित्वातुनिःपापमानयंतुममांतिकं तच्छ्रु
त्वातेभगवतःशासनंत्वरयान्विताः ५० निमेषांतरमात्रेणजग्मुर्वैवस्वतंक्षयं ऊचुस्तंप्रेतपतिंविष्णुशा
सनकारकाः ५१ दूताऊचुः भोप्रेतपतयोयूयंमेनतुंचतलुब्धकं निःपापंचैवनेष्यामोवैकुंठंभुव
नंप्रति ५२ यमदूताऊचुः यमशासनकर्त्तारोवयन्नान्यस्यकस्यचित् कस्मादेनंविमोक्ष्यामोभवताहवचना
द्वयं ५३ विष्णुदूताऊचुः वैकुंठभवनादेनंवयंनेतुंसमागताः बलादेनंचनेष्यामोयद्येनंनविमोचथ ५४

प्रह्लाद उवाच ततः क्रुद्धास्तु ते दूतास्तु द्रोयेवाभिद्रुद्रुसंयुधः नानायुधधरास्तांस्तु युद्धायसमुपाक्रमन् ५५
विष्णुदूतैस्ततस्तांस्तु नाउपिच्चाविमुच्यते पाशांश्छित्वाच पौंड्रं च गृहीत्वाययुरोजसा ५६ यमदूताश्चतेसर्वेयमांति
८ कमुपाययुः ५७ रुदंतोभिन्नमूर्द्धानोदीनास्याआश्रुसंयुताः सभास्थितंधर्मराजंनत्वासर्वंन्यवेदयन् ५८ ८
धर्मराजोपितच्छ्रुत्वाक्रोधेनमहतावृतः चित्रगुप्तेनचपुनःसविचारंसमाचरत् ५९ विचारयन्नपितदातत्क
र्मसुचिरंकृतं सुकृतंस्यापिनापश्यत्धर्मराजोपिपापिनः ६० ईदृशा अपिपापिष्ठावैकुंठंभुवनंप्रभोः
नीयतेतत्किमर्थंहिमायाकार्यप्रशासनं ६१ पापानामधिकारस्यात्रास्तिकिंविष्णुयोजनं इत्युक्त्वासूर्यतनयः
श्चित्रगुप्तसमन्वितः ६२ जगामविष्णुभुवनंवैकुंठंचरणांतिके वेदितोद्वारपालेनप्राप्याग्रीकेशवस्यच ६३
दंडंचशासनंमुद्रांविष्णोरग्रेनिधायच विजिज्ञपत्सुखीकेशवंप्रणिपत्यपुनःपुनः ६४ यमउवाच किमने
नेनाधिकारेणदेवदेवजगद्गुरो यदीदृशाअपिहरेमहापातककारिणः ६५ वैकुंठमागमिष्यामिकेवलंभ
ममप्रभो लक्ष्मीपतेनचविभोस्यधिकारःसमर्पितः ६६ स्वतंत्रस्त्वंकृपासिंधोसततंभक्तवत्सलः कर्ताहर्ता
पालयिताब्रह्मादीनांपरायणः ६७ मायाकारणिकानूनंजगद्धोजगत्पतिः निराशीर्निष्कलाहीनोली
लयोपात्तविग्रहः ६८ क्रीडेयंतवदेवेशाविष्णुकर्मन्नमोस्तुते विज्ञापयामिभगवन्नवधेहिकृपांकुरु ६९
पौंड्रकोलुब्धकोयंवैजन्मादिमरणांतिकं पापकंचुकपूर्णाभिःशुभकर्मविवर्जितः ७० ब्रह्महत्यादिपा
पानिपितृमातृवधस्तथा स्त्रीबालगोपशूनांचवधसंख्यानविद्यते ७१ परापहारचौर्यादिर्दुर्लुंठकोमार्गरोधकः

५१ यावंतिखलु पापानि ब्रह्मादिकानि कमलापते। ७२ कृतान्यनेन सर्वाणि सुसमीकेन चाहतः ईदृशोपि यदि स्वामिना
नीतस्तवपार्षदैः ७३ किंकरान्मेभिरुत्साद्यो पाशान्संछिद्य सर्वतः स्पर्शनं हि मम पापकर्मस्पर्शमीश्वरः ७४
श्रीभगवानुवाच धर्मराजविजानीहि यन्मां वदसि पुत्रकं नचतेकथयिष्यामि त्वयाविज्ञापितः स्वयं ७५
पापिष्ठा दुहनायांति सत्यं सत्यं रवेः सुत पद्यप्यनेन पापानि कृतानि बहुलान्यपि ७६ तथाप्यंतेस्य संजा सु
तं सर्वपापक्षयावहं तुलसीकाननोत्थेन वायुना सुखकारिणा ७७ तुलसीरजसोस्पर्शः पूर्वपुण्येन
दुर्लभः तेन संस्पृष्टसर्वांगो दग्धपापोभवत्किल ७८ त्वत्किंकरैः कृष्यमाणस्त्वदाज्ञापालकैस्ततः मम
हृत्तैरिहानीतः क्षीणपापो हलुब्धकः ७९ तुलसीवायुसंस्पृष्टं क्षीणपापं नरोत्तमं परिहार्यमेवहि त्वं च
दूतानां विशेषतः ८० तुलसीस्मरणे युक्तस्तुलसीपत्रभक्षणं तुलस्यारोपणकृतं तुलसीकाष्ठधारणं ८१
परिहार्यमेवहि त्वं सर्वथा दंडधारकं जन्मप्रभृतियः पापं करोति सततं पुमान् ८२ इत्युक्त्वा विससर्ज्येनं दे
वो लक्ष्मीपतिः प्रभुः यमोपि स्वपुरं गत्वा यथापूर्वमवर्त्तत ८३ इति श्रीपद्मपुराणे प्रभासखंडे तुलसीमाहात्म्ये
चतुर्थोध्यायः ४ तुलस्यारोपणं कृत्वा पालयंति च ये नराः तेषां नश्यंति दुष्कृतानि पापान्यार्जितानि वायुत १
अत्रैवोदाहरंतिममितिहासं पुरातनं पुराकैलासशिखरे नानाधातुविचित्रिते २ नरसेर्मयूरसंजुष्टे
हरिणीगणसेविते कोकिलालापवाचाले वापिकासमसंकुले ३ उद्यानशतसंवृत्ते कलधूतमये गिरौ
निवसन्पार्वतीनाथो जगामोद्यानमीक्षितुं ४ सकौतुकेन विश्वात्मा फलपुष्पसमन्वितैः नानावृक्षद्रुमाः कीर्णो कृसपादपरंजितं ५

पं

चिंतामणिगणाकीर्णपर्यंकेदेवोमहेश्वरः माधवीमंडपच्छायानिषसादमुदान्वितः ६ तस्यपश्चाद्गतादेवीपा
र्वतीगिरिनंदिनी शनैर्निभृतमागस्यपश्चाद्भागेनलीलया ७ विनोदार्थंविभोस्तस्यसंवृणोतिस्मलोचने
लोकस्यचक्षुस्सूर्येंदुलोचनेतुविभोर्यतः ८ अतस्तयोःपिधानेनरविसोमावस्तमापतुः अखंडलमभूत्सर्वं
८ तमसापरिवेष्टितं ९ नष्टानिसर्वकर्माणिनिःस्वाध्यायमभूज्जगत् नष्टाश्चपक्षिपशवःसंतःसत्कर्मवर्जि ८
ताः १० युगषट्कमतीतंचतस्यक्षणमिवाभवत् ततोदेवोमहादेवस्सर्वज्ञानचक्षुषा ११ विलोक्य
भिलयांचक्रे तृतीयंलोचनंतदा तेनकिंचिज्जगच्चक्रेसोच्छ्वासंभीतिवर्जितं १२ ततोविमुच्यनेत्रेसती
दृग्गोचरेस्थिता विनयावनताभूत्वातस्यपार्श्वगताभवत् १३ ततोबिकाशमालोक्यबभाषेचंद्रशेखरः
अगराजसुतेदेवीत्वयाकष्टतरंकृतं १४ विदधत्यास्मियुग्मंमेपिहितौशशिभास्करौ युगषट्कंगतंभूमौत
त्क्षणमिवाभवत् १५ नष्टालोकाश्चसर्वेपिमहत्पापमुपार्जितं प्रायश्चित्तंविनानाशंकथंप्राप्स्यतिनत्तव १६
प्रायश्चित्तंकुरुत्वंतु पापनाशायसत्वरं इतिशंभोर्वचःश्रुत्वावेपमानांगयष्टिका १७ शुष्कताल्वोष्ठजिव्हा
सापरिम्लानमुखांबुजा अज्ञानान्मेतमस्तुल्यंमहत्पापंप्रमादतः १८ इतिचिंतापरादेवीमहेशंसाव्यजि
ज्ञपत् पार्वत्युवाच नमस्तेजगदाधारगंगाचंद्रार्धशेखर १९ यत्कृतंमेप्रमादेनदुरितंज्ञानहीनया विना
शार्थंममक्षिप्रंव्रतंमांदीयतांप्रभो २० मामुद्धरकृपासिंधोमग्नांपापसागरे श्रीसदाशिवउवाच कल्या
णिशृणुयत्नात्तस्यप्रायश्चित्तंमयोच्यते २१ कृत्वाचतुलसीपूजांगौरीशुद्धाभविष्यसि विनातुतुलसीपूजांत्रि

शिवपूजाविनाकृतं २२ कथंनश्येततत्पापंसर्वप्राणिवधार्जितं पूजितातुलसीदेवीभक्तियुक्तेनचेतसा २३
अपिमुक्तिंददात्येषापापनाशेकिमुच्यते पापानांनाशनेसैवहेतुर्नान्यद्वरानने २४ कर्मभूमिंसमासाद्यचैवंकै
लासाच्छुचिस्मिते श्रीमत्सत्यव्रतक्षेत्रंकांचिंगच्छमहापुरीं २५ कइतिब्रह्मणोनामतेनैवस्वयमर्चिता त
स्मात्कांचीतिविख्यापुरीसर्वार्थदायिनी २६ पंचसाहस्रमानायःस्वयंतत्कर्मसिद्धिदः आस्तेवरदराजाख्यो
वनमालाविभूषितः २७ तस्मिन्वरदराजस्यसन्निधौतुलसीवनं रोपयित्वायतमनाःपूजयित्वावरानने २८
कश्चित्कालस्तयास्तेसदापुष्पसमन्वितः तन्मूलेसैकतंलिंगंकृत्वामद्गतमानसः २९ यदेकांबरनाथाख्यं
लिंगंतेजोमयंमहत् आहृत्यतुलसीपत्रैःपूजयत्वंदृढव्रता ३० पूजयातुलसीदेव्यास्तथालिंगार्चनेनवा
भद्रेतुष्टोभविष्यामिवत्सरांतेनसंशयः ३१ मधुनाचतुरोमासाःपयसामासपंचकं नारिकेलोदकेनैकं
चापीक्षुरसेनच ३२ प्रवर्द्धयत्वंतांदेवींपायसान्नंनिवेद्यच उपचारैःषोडशभिःपूजयाप्रतिवासरं ३३ तेन
सातुष्टिमापन्नानिःपापीत्वंकरिष्यति मत्समंचैवतनयंतुभ्यंदास्यामिषण्मुखं ३४ तस्याःपूजाविधानेनत्रि
वलिंगार्चनेनच अहंचप्रीतिमापन्नःकामान्दास्यामितेऽखिलान् ३५ तस्माच्छीघ्रंतत्रगत्वातुलसीपूजनंकु
रु इत्युक्तासातदादेवीप्रणम्येशंपुनःपुनः ३६ जगामतूर्णंतत्रैवकांचिपुर्यांमहेश्वरी तत्रपंपानदीतीरे
स्थितातुतुलसीवनं ३७ संप्राप्यचाम्रनंलिंगंसैकतंचूतसन्निधौ कृत्वाविधायतत्रैवततएकांबरंशिवं ३८
आनर्चतुलसीपत्रैरभिषिंच्यमहेश्वरं प्रत्यहंपूजयामासतुलसींभक्तितःशुचिः ३९ गंधपुष्पादिभिर्दीपैर्नैवेद्यैः

९
पायसादिभिः प्रदक्षिणनमस्कारैः स्तोत्रैर्नानाविधैरपि ४० तामुद्दिश्यान्नदानेन सदाचैवानिवारितं अन्न
पूर्णेतिनामचैवं यथार्थमकरोच्छिवा ४१ सहस्रतुलसीपत्रैः कुर्वती नियमार्चनं एकस्यापिन पत्रस्य न्यूनता
मकरोद्यदा ४२ ततआरभ्य विख्यातमपर्णेत्यभिधावै एवंसावर्षपर्यंतं नियमेन समन्विता ४३ तस्याः प्र
जाविशेषेण तुलसी तुष्टिमागमत् उवाच गाढमालिंग्य गिरिजां तुलसी तदा ४४ तुलस्युवाच ममते गि ९
श्वलाभक्तिर्या रुतागिरिराजप्रिये तुष्टाम्यहं तपाभक्त्या वरोयस्तेभिवांछितः ४५ तथाचपरमहाप्राज्ञेवरंदा
स्यसुमध्यमे पार्वत्युवाच यदि तुष्टासि तुलसी जातं लोकस्य संशयात् ४६ पापं तन्नाशमायातु शीघ्रमेहरि
वल्लभे तुलस्युवाच यदासंहरते शंभुर्जगदेतच्चराचरं ४७ तदाकस्य भवेत्पापं हरस्य कदरितद्वद् अथापि
युवयोर्लीलान के नान्येन गम्यते ४८ लोकस्य संग्रहायैव करोम्येत तत्तु नैवेवे मयाहंयानभेदोस्तिमनागपि
गिरीन्द्रजे ४९ यमेवाहं वरारोहे मद्रूपात्वं च नान्यथा यथा विष्णुस्तथा शर्वस्तथा त्वं च यथास्म्यहं ५० आवयो
र्नांतरं किंचिद्विष्णुशंकरयोरिव हरिशंकरयोर्भेदमावयोश्च करोति यः ५१ सयाति नरकं घोरं यावदाभूतसंप्लवं
तस्मात्त्वत्स्मरणादेव यांति पापानि संक्षयं ५२ तस्मात्तव कथं पापं विद्यते भुवनेश्वरि तथापि मम पूजाभिः
शिवलिंगार्चनेन च ५३ भक्षणान्मम पत्रस्य तव पापं गतं क्षयं पूजयित्वा हरिं भक्त्या प्रसादं तुलसीदलं ५४
नैवेद्येन सह प्राश्य सरूपा रुद्रकेन च केवलायामंजर्यावाभोजयेत्स कदाचन ५५ तस्य प्रातिश्रयं क्षिप्रं मासोप
तककोटयः प्रीतिस्तज्जा विशेषेण भवत्येव ममानघे ५६ एतेषां ज्ञानये पूजा केवलं न भवेन्मम ये यं चीत्य

ते कामं तं तं प्राप्नोति निश्चयः ५७ तस्मादीशानसहशं पुत्रं च प्राप्स्यसे चिरात् तगच्छ देवि कैलासं यत्र ति
ष्ठति शंकरः ५८ मत्प्रसादाच्छिवस्त्वय्यं रास्यते गंस्यसंगमं दुर्ल्लभं नास्ति हरो भक्तानां च वरप्रदः ५९
इत्युक्त्वांतर्हिता देवी तुलसी हरिवल्लभा शंकरोपि तदाज्ञाय गिः पापां पार्वतिं प्रियां ६० वृषमारुह्य सगणः
पर्यटंस्तां जगाम ह अयि देवि समागच्छ निःपापासि गिरिप्रिये ६१ यास्यामो भवनं तावत्सरित्सा तेमया हृता
त्वया जितोस्मि भद्रं ते जानत्स्व हरा दोस्म्यहं ६२ एकभावेन मद्देहस्यार्धस्य स्य घदिने शुभे इत्युक्त्वा तां समालिंग्य
अर्धनारीश्वरेश्वरः ६३ वृषमारुह्य गिरिजां आययौ कैलासपर्वते एवं पापस्य शांत्यर्थं पार्वत्या अपि पूजिता ६४
पुत्रार्थश्च विशेषेण पूजये द्विष्णुवल्लभां गुणैरलंकृतं चैव पुत्रमाप्नोति संपदं ६५ इति श्रीपद्मपुराणे
तुलसीमाहात्म्ये पंचमोऽध्यायः ५ ६७ प्रल्हाद उवाच शृणु माहात्म्यमन्यच्च तस्या देव्याश्च वैभवं स
र्वपापप्रशमनं सर्वसौभाग्यदायकं १ कदाचित्तमसां राशिर्दुर्वासा मुनिसत्तमः जगाम ब्रह्मणो लोके
सुपजुष्टं महर्षिभिः २ तत्रांतरे विधिर्बाल्यात्सावित्र्या च सतोषितः घृतक्रीडसमासक्तो न जानीन्मुनिमा
गतं ३ स चावगणनात्क्रुद्धस्तदा प्रजाविलंबनात् शशाप भारतीं यो नो कमंडलुजलेन वै ४ यतो मामवजा
नीषे योषिद्द्वयसमन्वितः विष्णुमायाभियुक्तस्य तव स्त्रीषु चातुरी ५ गच्छेत्ति मुनिः क्रोधादस्य सीछाप्र
वारिज़ित् धाता भीतः सरस्वत्या सावित्र्या च सहोस्थितः ६ समस्तज्ञानसंपन्न मया ज्ञातो मुनिसत्तम शापं नि
वर्तयमं प्रार्थयामि महामुने ७ मुनिराह चलं ब्रह्मन्मच्छापो नान्यथा भवेत् तगच्छ नैमिषारण्ये तपसाराध्य केशवं ८

म

तन्मायाज्ञाननिर्मुक्तोऽभविष्यसिनसंशयः इत्युक्त्वासगणोऽब्जानदादेशांविधिर्नेशात् ९ विधिर्यानैस्तथानाह
४० ग्विधानाचलपञ्चरन् नशश्चिरंप्रजालोकाःस्वधास्वाहाविवर्जिताः १० तत्रांतरेहरिस्तस्यतपसाराधितःप्रभुः
प्रादुर्बभूवतत्रैवशंखचक्रगदाधरः ११ तंदृष्ट्वाप्रणिपत्याशुतुष्टावचलतांजलिः ब्रह्मोवाच नमस्तुभ्यंज
गन्नाथचिदानंदैकविग्रह १२ चतुर्दशजगत्केलिसौधार्पितनिजोदर उन्नतश्चैवनिम्नश्चत्वंलघोऽणोमहानेवच १३
निराकारोपिसाकारसगुणोनिर्गुणोपिवा गुरुर्भवान्लघुश्चैवत्वमासमाचराचरः १४ विद्यामयोपिचाज्ञाना
द्विद्यामयउच्यते प्रसादंकुरुमेदेवदुर्वासाशापतोधुना १५ सृष्टिपाटवमप्राप्तंसीदाम्यितवमायया म
त्प्रमादंहरविभोतन्मायाज्ञानमाहर १६ इत्थंयाचनवचःश्रुत्वासंतुष्टःश्रीमाधवः प्रसन्नोहंतपोभिस्तेनि
यमैरीप्सितान्वरान् १७ विधास्यामिपदापन्नःसृष्टिकालविपर्ययः ब्रह्मोवाच प्रसन्नोपिदिवेशापमनुमपरास
र १८ अव्याहतंसृष्टिसयंममैवभवमस्तुवै श्रीभगवानुवाच ज्ञानवानपियन्मायांज्ञातुंशक्तोनवैभवेत् १९
दुरत्ययापिमन्मायाशंकरेणत्वयापिच मन्मायावैभवंज्ञातुंदेवैरपिनशक्यते २० मायाविमोहितात्मासि
सृष्टिपाटवमसजत् तन्मायामोचनार्थायममममायास्वरूपिणी २१ कुरुष्वतुलसीचिंतांतस्याःप्रजां
समाचर तत्प्रजालिलचित्तस्यकिंकार्यंघटतेनवा २२ महेशस्त्रिपुराणांचदाहेसामर्थ्यमासवान् तुलसीप्र १०
जयाकयाकार्यंसिद्धंनवाभुवः २३ तस्मात्सर्वप्रयत्नेनतामाराधयपद्मज श्रुत्वैवसृष्टिकर्तव्यंतवसम्य
ग्भविष्यति २४ इत्युक्त्वांतर्दधेविष्णुःपश्यतोस्यप्रजापतेः ततस्तस्याःप्रभावेनसृष्टिकर्तुसमाययौ २६
+सतत्लोकंसभासाद्यसोपिसर्वायांगुणेनदा २५ आरोप्यतुलसींदेवीपूजयामासभक्तितः २७

तस्माच्च पूजनीयासा तुलसी विष्णुवल्लभा यस्मिन्नेतां गणे देवि पूज्यते भक्तिमन्नरैः २६ तद्गृहं गृहमित्याहुः
स्मशानमितरं विदुः हंत ते कथयिष्यामि मारुदेव्यास्तु वैभवं २७ सुमालिनीति विख्याता वामदेवस्य नंदिनी
विष्णुभक्तिसमायुक्ता नामेवाप्तजयेत्सदा २९ साकदाचिन्मुनिश्रेष्ठं पितरं तस्य भाषत भगवन्नास्ति मे विष्णुभक्ति
हृदयनंदिनी ३० नान्यदेवेषु रमते मम चेतो निरंतरं किं करोमि प्रसादेन नाकांतिं प्राप्नुयाद्धरः ३१ इति तस्या
वचः श्रुत्वा जगाद मुनिसत्तमः आकर्णय वचः सत्यं सुमालिनि सुमध्यमे ३२ तुलस्याराधनास्वपः सर्वान्कामान
वाप्स्यसि स्त्रीणां विशेषतः सैव तुलसी दियता मता ३३ रोपयित्वा सदा पूज्या भक्त्या युक्तं चकार ह कदाचित्सोद
रास्तस्याः कुमाराश्च थषोडश ३४ समित्कुशार्थमाजग्मुर्वनं ऋषिगणार्चितं तत्राश्रमं गौतमस्य दृष्ट्वा विविशुरं
तिके ३६ तत्र ते सरसो मध्ये स्नानात्कलुषितं जलं स्नातुकामो गौतमस्तु दृष्ट्वा कलुषितं सरः ३७ शशाप ता
न्भवन्धाः भवंतिति सत्वरं तच्छापेनाथ तां प्राप्तास्ते मुनिपुत्राः सुदुःखिताः ३८ अजानाश्च तदा मार्गं बहुकालं
चेतगृहं अनागतान्समुद्दिश्य मुनिर्दुःखितमानसः ३९ दिव्यदृष्ट्या पवत् तच्छापं ज्ञात्वा शोकयुतोऽभवत् सा तु
तापितरं स्वस्य दृष्ट्वा शोकाकुलं तदा ४० अपृच्छत्कारणं तस्य सोपि तस्यै न्यवेदयत् विष्णोः पूजार्थमुत्थाप्य
पितरं साथ कन्यका ४१ आसीद्धर्ममंडपं देव्याः प्रांगणं परमाद्भुतं तेषां मंथवनाशाय देवीमाराधयत्तदा ४२ सापि प्र
सन्नहृदया मुनिपुत्रान्विमोचनं विततार दयायुक्ता विष्णुर्चागिरिप्रमोदिनी ४३ आश्रमेन रहितास्तेपि देव्याः करुणया
तदा आजग्मुः स्वाश्रमं तूर्णं आरभ्य च समित्कुशान् ४४ गौतमश्चापि तच्छापात्सम्भ्रांतापसमन्वितः अन्वेषयामास

जवादाहारार्थंमुनेःसुतान् ४५ समागत्याथतंदेवंसमालोक्यचतान्पुनः ध्यानेनतेषांविज्ञायहृदयेःकारणमा
त्मवान् ४६ अन्येद्युर्वामदेवस्यतत्राश्रमपदंगतः वामदेवोपिसन्मुनिःगौतमंस्वाश्रमागतं ४७ स्वागतेनार्च
तु यामासपाद्याद्यैर्भिरुदारधीः संतुष्टस्तेनसंस्पृष्टस्तदागमनकारणं ४८ उवाचगौतमःसोथतपस्वीकुलभूषणः
त्वत्कृतावैभवंद्रष्टुमागतोस्मिमहामुने ४९ तुलस्याराधनादस्याःप्रभावंवेद्मितादृशं नगच्छामिनिजावासं ११
पूतोस्म्यस्यसकृद्दर्शनात् ५० इत्युक्त्वासमुनिर्मामंअजगामस्वाश्रमंपुनः पुत्रदारैःसमायुक्तोदेवीमारोप्यचाजिरे ५१
पूजयामासविधिवन्नित्यंभक्तिसमन्वितः तुलसीवर्द्धयित्वातुसिंच्यशुद्धैर्जलैःशुचिः ५२ सर्वान्कामानवाप्या
थविष्णुलोकमथासयान् ५३ इतिश्रीपद्मपुराणेतुलसीमाहात्म्येषष्ठोध्यायः ६ ७ ७ प्रल्हादउवाच
सुषेणनामराजासीद्दुरगाख्यापुरेश्वरः विक्रमेणचवीर्येणनयेनविनयेनच १ तस्यभार्याभवत्साध्वीवसुसे
नेतिविश्रुता पतिव्रतामहाभागारूपेणाप्रतिमाभुवि २ सतस्यांजनयामासदेवसेनेतिकन्यकां समगुल्फां
सुकेशांतांसुमुखींचारुदर्शनां ३ बिंबोष्ठीगजनासोरुपीनोन्नतपयोधरां तन्वंगींचारुनखांसुदंतीमृजु
जांसती ४ रूपेणाप्रतिमांसातुत्रिवलीशोभितोदरा बाल्यप्रभृतिसंस्थाप्यमनःसर्वेश्वरेश्वरे ५ साविष्णोः
पूजनंचक्रेवैष्णवानांचतर्पणं तुलसीपूजनंनित्यंचकारप्रयतासती ६ एवंविधापृथक्स्त्रोणीयदायौवनमा
स्थिता तांविवाहेचितांकन्यांदृष्ट्वाचिंतासमन्वितः ७ स्वयंवरेमतिंचक्रेसमाव्हयतपार्थिवान् साहंकारा
नृपपुत्रांतान्देवसेनासुमध्यमा ८ पप्रच्छक्रमशःसर्वान्श्वेतद्वीपःकथंस्थितः कीदृग्विवर्त्ततेतत्रज्ञा
त्वैवंवरयेवरं ९ तत्तूचुर्नजानीमःश्वेतद्वीपस्यसंस्थितिं तच्छ्रुत्वासावदत्साध्वीसर्वान्नृपकुमारकान् १० यथागतंगच्छतस्वंराजानोनुनयायिनः

तस्तेतेनष्टसंकल्पाज्ञात्वा तस्याः पितुर्बलं ११ हरणे रचितां बुद्धिं निवर्त्य निखिलं गताः सुमत्रावञ्चितवरः कश्चि
त्कथामेतामितस्ततः १२ देवदत्ताभिधो विप्रो नतु सुरं च जगाम ह सगत्वा राजभवनं राजानमिदमब्रवीत् १३ श्वे
तद्वीपो मया दृष्टो मह्यं कन्या प्रदीयतां राजा तु तं प्रविश्यान्तःपुरं कन्यामदर्शयत् १४ सा तं पप्रच्छ सुश्रोणी श्वेत
द्वीपः कथंविधः स तयोक्तो जगादैवं श्वेतद्वीपो मनोहरः १५ तत्र द्वीपे हरेर्वेश्म सर्वगंधाधिवासितं गंधर्वा
प्सरोभिश्च गीतनृत्यसमन्वितं १६ नारदाद्यैर्मुनिवरैः सततं पर्युपासितं गरुत्मता घोषितं पन्नगेंद्रनिषेवि
तं १७ इत्यादि बहुशस्तेनः श्रुत्वा वर्णितमंगना चेटिः प्रचोदयामास कदा हि सत्साध्यतामिति १८ स ताभि
र्गलहस्तेन तस्मान्निःसारितो गृहात् अवमानकृताद्दुःखादतीव सम्प्रघतः १९ चकेच मतिमित्यर्थी मनस्वी
मनसा पुनः श्वेतद्वीपं ततो गत्वा भाष्ये हं नान्यथा क्वचित् २० स संकल्पं ततः कृत्वा महेंद्रमगमद्गिरी सज्जाम
दग्न्यमासीनं ददर्श तपसां निधिं २१ नमश्चक्रे महाविष्णोरवतारो महायनं श्वेतद्वीपमयं सम्यक् कृत्वा स्यत
भगवस्त्रियं २२ ततः प्रणम्य स मुनिं पृष्टः स्वागमनं प्रति यथातथं समाचख्यौ तद्विपार्थं समुद्यमं २३ स ज
गाद नमेदृष्टः श्वेतद्वीपो मनोहरः प्रयाहि बदरीं भद्र मुनयस्तत्र संस्थिताः २४ श्वेतद्वीपप्रयातारस्ते तव स्युं
ति संस्थितिं श्रुत्वैवं देवदत्तस्तु जगाम बदरीवनं २५ ददर्श तत्र संस्थितान्मुनीञ्छुद्धांस्तपस्विनः अभिवाद्य
ततस्तान् स्वकर्त्तव्यं व्यजिज्ञपत् २६ ते तमूचुर्महात्मानो न शक्यं खलु भो त्वया जीवितानेन देहेन यातुं दे
वस्य तत्सदं २७ किंतु देव्याः प्रसादेन तुलस्याः द्रष्टुमेषि यदि श्रीनामुनिर्महातेजास्तस्याः पूजाविधिं परं २८

कथयिष्यतिसंस्पष्टस्तमेवशरणंव्रज तेसेभ्यवादेवदत्तस्तुमे तंशरणमियिवान् २९ ततः आह महातेजा
देवस्तेन तोषितः इतस्ते कथयिष्यामि तुलस्याः अर्चनमुत्तमं ३० आराधय महादेवीं येन तुष्येन्महेश्वरी
१२ सेवां कुरु प्रयत्नेन तुलस्या वै दलेषु च ३१ जपं चैव महामंत्रं तुलस्याः प्रीतिवर्द्धनं तुलसी श्रीसखि शुभे पा
पहारिणि पुण्यदे ३२ नमस्ते नारदनुते नारायणमनःप्रिये ३३ सप्तकोटिजपं लक्षामंत्रस्यास्य महामते ।
देव पूजयस्व महादेवीं सर्वप्राणिनमस्कृतां ३४ ध्यायस्व तु तुलसीदेवीं सर्वप्राणिनमस्कृतां क्षीराभिषेकैः संसेव्यां २२
गंधपुष्पैः समर्चय ३५ ततोनेन शरीरेण श्वेतद्वीपं गमिष्यसि ततो[illegible]सप्रणम्यासौ देवीमाराधयत्तदा ३६
ततो द्वादशवर्षांते स्वप्ने देवीं ददर्श ह प्रसादसुमुखीं देवीं श्यामां कुंचितमूर्द्धजां ३७ बालदूर्वादलश्यामां
पूर्णचंद्रनिभाननां सुदंतीं चैव बिंबोष्ठीं नीलांभोरुहलोचनां ३८ वरदाभयहस्तां गौरस्तनीं सलशुभांकरां ।
वामाभरणसंपन्नां हरि[illegible]संनिभमध्यमां ३९ ततः सा देवदत्तं तमुवाच दंभुविस्मिता भो द्विजदत्त मद्दत्तेन त्वं
तद्वीपं गमिष्यसि ४० ततः प्रभाते संतुष्टः पूजयामास तां द्विजः ततो गच्छन्महानागो नरनारायणाश्रमे ४१
तद्वीत्यामुनयः सर्वे स्ववेश्मनि निलिल्यिरे द्विजस्तत्रासितस्तेन विवेशाद्रिमकोटरं ४२ सकोटरांतरे पृष्टिप्रे
रयन्सद्दर्शदि कुंडे हृश्वेतवदनं नृस्सज्ञागीसमन्वितं ४३ वज्रदंष्ट्रं महाकायं स्वर्णरोलनिभाननं कपाट
वक्षसं दीप्ततेजसा सूर्यसन्निभं ४४ पक्षवेगेन महता पातयंतं धराधरान् तर्कयामास मनसा गरुत्मानिति तं द्विजः ४५
गरुत्मान्कोटरं तरारभ्यासे समुपाविशत सुविस्मये स्वयं चायं मारस्वदुष्टप्रचगं [illegible] नगः सोतितुंगे [illegible] स्ते गरुत्मता ।

फणाभिस्ताडयन्नेत्राभ्यांमपश्यच्छिन्नतासुतं ४७ सतमादायतेजस्वीगरुत्मान्पन्नगोत्तमं खंडयित्वातदाशीघ्रं
भक्षयामासपक्षिराट् ४८ ततस्तेनिर्भयाःसर्वेप्रीतात्मामुनिसत्तमाः सुपर्णमब्रुवन्गत्वबदर्याश्रमवासिनः ४९
अनेनभक्षितोदेवदुष्टसर्पेणतापसाः तवप्रसादाज्जातास्मोनिर्भयाःपन्नगेश्वरात् ५० स्वस्तिवोस्तुगमिष्या
मिश्वेतद्वीपमनोहरे इत्येवंब्रुवतस्तस्यकोटरात्तार्क्ष्यपक्षिणि ५१ प्रविवेशाद्विजस्तस्मात्स्वरुद्राज्ञामवापसः ।
श्वेतद्वीपेश्वरेणाघनेतुंत्वांप्रेषितोस्म्यहं ५२ अयांहिद्विजभद्रंतेइत्युक्त्वोरस्यखेचरं नानादेशानतिक्रम्यक्षी
रोदार्दीश्चसागरान् ५३ अतीत्यक्षीरजलधिंप्रविवेशारुणानुजः स्वर्णप्राकारसहितांपुरीममृतसन्निभां १४
सर्वश्वेतैर्नरैर्जुष्टांददर्शहरिवल्लभां तन्मध्येसुमहद्धामशतयोजनमुच्छ्रितं ५५ द्वीपंरत्नमयंश्वेतंनाना
भवनशोभितं तन्मध्येतुमहद्दिव्यंक्षीरोदमिवनिर्मलं ५६ भवनंरत्नखचितंददर्शाथसखस्थितः द्विजोने
त्रपरंतत्रव्याकुलीकृतभत्रां ५७ ततःप्रकंपितःसोथपपातभुविमूढधीः गरुत्मांस्तुलसीप्रीत्यैद्विजोमू
र्द्धाद्विजप्रियः ५८ विवेशभवनंश्रीमद्वैदुर्यमणिमंडितं सतत्रदिव्यास्सरसोदृष्ट्वाविस्मयमागतः ५९ तामिः
पृष्टोयथातत्वंदेवदत्तउवाचह अहंतुतुलसीनाम्नाश्वेतद्वीपमनोहरं ६० तस्याधिष्ठानमसीहतांद्रष्टुंसमुपा
गतः तास्तद्भुवनेमत्स्मेदर्शयामासुरादरात् ६१ ततोहंव्याहरंपोलेर्द्विजन्यंस्तन्निवेदयन् तुलसीचततः
कथांदेवदत्तागमंसती ६२ तमानाय्यद्विजंतत्रपप्रच्छकुशलंस्वयं स्वप्नेदृष्टांतुतांदेवीप्रणम्यचपुनःपुनः ६३
तथारूपांतुतांमत्त्वातुष्टावाश्रुलताजलिः नत्वेप्रसन्नासादेवीज्ञात्वातद्भक्तिमादरात् ६४ दासीःसंचोदयामास

भोजयंतुममाज्ञया दिव्यान्नपानैरुचिरैरतिथिंचागतंद्विजं ६५ देवसेनाचशायनेदर्शनीयावरार्थिनी तुलस्या
ज्ञांतथाश्रुत्वाद्विजोविस्मितमानसः ६६ भुक्त्वापीत्वाचजत्हर्षेसघस्तेजोबलान्वितः देवसेनांचशायनेचित्रांशु
१२ कवरावृत्तां ६७ दृष्ट्वानकिंचिद्प्रोवाचदेवीचेटीरभाषत द्विजनेत्रेपिदग्धंवासरव्यःकौतुककारणात् ६८
निमील्यलक्ष्यनेत्रेतास्तसुसृज्युगताःपुनः सोप्युन्मील्यततोनेत्रेददर्शोविस्मयान्वितः ६९ उरगाख्येपु
रेराज्ञोदेवसेनाशुचिस्मिता राज्ञोंतिकेदेवसेनाब्राह्मणंपर्यपृच्छत ७० श्वेतद्वीपःकथंकीदृग्वदमेद्विज ९३
सत्तम यथापृष्टोद्विजोप्येनांप्रवक्तुमुपचक्रमे ७१ यथाचतुलसीदृष्टायथादेवोहरिःस्वयं नृत्रत्तीश्रीतु
लसीदेव्याःप्रसादपरमाद्भुते ७२ तत्रदृष्टातुशायनेपतितांभवतीमृता श्रुत्वातदेवसातत्रजहौप्राणान्से
मध्यमा ७३ सुषेणोवसुसेनाचततोविभ्रमदुःखितो देवसेनामृतायांतुतस्यानिर्विण्णमानसः ७४ आश्र
दश्रमंतुसंप्राप्यपप्रच्छद्विजसत्तमः सयोगदृष्ट्याज्ञात्वैतद्देवदत्तमुवाचह॥७५॥अत्रिर्नाममहर्षिरभवत्तस्यशिष्यः
पुराभवान् सोभवत्तुलसीभक्तस्तस्मिन्नवलितसरः ७६ श्वेतद्वीपंसतुलसीसेवयाप्रययौकिल ततस्मी
पेचामरस्थदेवसेनाभवत्तदा ७७ तांचकामहत्त्वापरूपलापिशांतेथवहि तयोस्तुलसीरक्तांतंतुलसीसमु
दीक्षयत ७८ महर्षिःशिष्यमशापत्तस्मीस्त्रतांभविष्यसि शशापतुलसीचेटींप्यसुर्भवसुनिंदित ७९ ततः
प्रसादयामासतुलसींमुनिसत्तमः तयोःशापविमोक्षार्थंतुलस्यपिकृपान्विता ८० देवसेनात्वंप्राप्यदेहां
तरमवाप्स्यसि यावद्देनोदेवसेनांशिष्यस्त्वममांतिके ८१ दृश्यतेतावदेवेयंचौरोभूमावतिष्ठति देहांत

रमनुप्राप्यलोकेमानुषसंज्ञिके ८२ मात्तुपंदेहमास्त्वायत्तावस्त्वणस्पतिर्भूतले जातिस्मराचसालग्रमवि
ष्यतिसुमध्यमा ८३ पुनःस्वेनैवरूपेणप्राप्यसेषाममांतिकं सोप्येवदन्मुनिर्देवीमामत्रिष्येहल्पानिलः ८४
सोबदर्याश्रमंतत्रगत्वातप्यतपस्थितः आख्यानावदरीवपुर्मयातवमाहात्मते ८५ संसिद्धश्चासीत्तपसा
पूर्वजन्मगुरोर्दृत्ता तुलसीश्रीसखिशुभेपापहारिणिपुण्यदे नमस्तेनारदनुतेनारायणिनमोस्तुते ७ इमंमं
त्रंजपन्नाभुक्तवन्नेत्रैवंमाहात्मते ८६ तिष्ठदेव्यामुनेतेनशीघ्रंसंसिद्धिमेष्यसि प्रल्हादउवाच सतुतत्रगिरा
हारोद्वारस्थैवोवसत्समाः ८७ तत्रदेवर्षिरागत्यनारदस्तमभाषत देवदत्ताप्पिचामंत्र्यहसन्नुरयागि
रा ८८ नारदउवाच तुलस्याश्चासमानुतंप्रोषितोस्मितवांतिकं श्वेतद्वीपादागतोस्मिपूर्वजन्ममनुस्मर
सिद्धंगतिंक्षणलब्धामियासरुगमिष्यसि प्रल्हादउवाच ततःसनारदंदृष्ट्वाप्रणनामकृतांजलिः ९०
समर्च्यविधिवद्भक्त्यासमनुज्ञाप्यतान्मुनीन् श्वेतद्वीपंजगामाशुनारदेनसमन्वितः ९१ तुलस्याभवने
गत्वाप्रणिपत्यपुनःपुनः तत्रस्थितांदेवसेनामुद्देहलसुलोचनां ९२ ततःसातुलसीप्रीत्यानारदंसमु
वाचह भोभोनारदमेंद्रैतेदेवसेनामनिंदितां ९३ वैवाहिकेनविधिनादेवदत्तेनियोजय ततःप्रज्वाल्य
साप्यग्निंतुलस्याज्ञामवाप्यच ९४ आहयामाससैवपाणिंदेवदत्तेनमंत्रवित् अलंकृताप्यतोदेवीगतोपि
ध्यंहरेर्गृहं ९५ देवदत्तस्ततोलब्ध्वादेवसेनामनिंदितां अथतेनैवरूपेणतुलसीसमन्वितेरः ९६ तुलसी
सेवनादेवहरेस्थानमासवान् सूतउवाच पठेयइदमाख्यानंभृणुयाद्वासमाहितः ९७ तस्यात्रयोभवेत्कामःसंसिद्धिश्चेहजन्मनि इति

१५

गरुडउवाच आसीदुदयनोनामराजाराजीवलोचनः उज्जयिन्यामुदारश्रीःशांतोदांतोजितेंद्रियः १
सकदाचित्समद्धार्थीवृद्धैर्मंत्रिभिरावृतः तीर्थयात्राकृतवनोजगामयमुनांनदीं २ तस्यभार्यामहाभागासुशीला
नामनामतः। नमन्वगात्समद्धार्थं।तीर्थयात्राकृतत्वरा ३ तौदंपतीसहायधौरेयैर्नादिस्पवचसा जग्मतुर्मंत्रिभि
र्वृद्धैःसमंतौनवमुःकिल ४ मार्गेमितऋषिणांश्रेष्ठंतपंतंपरमंतपः वसिष्ठंविदुषांश्रेष्ठंदीप्यमानंददर्शह ५
अवतीर्यरथात्तूर्णंनमस्कृत्यमहौजसं अन्वासमासतुर्वृद्धौदंपतीपावकार्चिषं ६ सतुपप्रच्छराजानंकिमर्थो २४
यंतवोद्यमः अथ्रंजोहंमहाभागेत्यब्रवीन्मुनिसत्तमं ७ नचास्तिभिषयेच्छामेनथास्याअपिसुव्रत ततोनि
र्गत्यनगरात्तीर्थयात्रार्थमुद्यतः ८ नष्टुत्वाहवसिष्ठोपिमेवमस्तुमहीपते पुनस्तेयौवनंभाविसोमवंशोद्भवा
धिपहि ९ राजोवाच केनोपायेनजरसायुवाभ्यांमुनेवद सुशीलायाअपिकथंयौवनंसमुपैष्यति १० वसि
ष्ठउवाच शृणुराजन्प्रवक्ष्यामिचित्रंयौवनकारणं पीयूषजातितुलसीदेवीदेवनमस्कृता ११ तस्याःप्रसा
देनयुवांयुवानोऽभविष्यतः पुत्रश्चयुवयोरत्रभविताभवेतारव्ययः १२ ततोहिभारतवर्षेभविष्यतिसुशोभि
तं ततस्त्वंशृणुराजेंद्रकारणंकुलवर्द्धनं १३ तुलसीश्रीसखिशुभेपापहारिणिपुण्यदे नमस्तेनारदनुतेना
रायणमनःप्रिये १४ इमंमंत्रंसमुच्चार्यनमस्कृत्यप्रियःसखी उपचारैःषोडशभिःपूजयस्वमहेश्वरी १५
तस्यैःश्रीपतिंदेवंअमृतात्मानमीश्वरं अर्चयस्वमहाभागत्न्याचेवजनार्दनं १६ भुंक्तेनवारिणाहत्वातुल
सीमिश्रितेनच अभिषिच्यजगन्नाथंपिबसारोदकंशुभं १७ तुलसीमिश्रितेनाथअभिषिच्यस्वकांतनु

अस्याश्च लवभार्यायाः सिंचन्तीर्यनवैतनु १८ तुलसीवनमारोप्य पालयस्वाभिषिंचय यत्रदेवंहरिंसम्यक्प्रतिष्ठा
प्यमहौजसं १९ तत्रैवसरदौ देश्यत्वं निस्तिष्ठ तथापुरः पूर्वसंवत्सरस्यान्ते यौवनं युवयोर्ध्रुवं २० इतितस्यवचःश्रु
त्वानिजांचवरदेतपुरीं तत्राकारयदव्यग्रस्तुलस्यारामम द्भुतं २१ सुगंधैरालवालानिकृत्वा हीरैरपूजयत् सुगंधैः
कुसुमैर्निसंमर्चयसंकजेरपि २२ सहस्रं तुलसीनां च रोपयामास भूपतिः श्वेतानानसितानां च वालमामान्यना
न्वित २३ पूजयामासविधिवत्सदाभक्तिसमन्वितः नाम्नांसहस्रेणनृपोतुलसीमंजसीदलैः २४ भ्रामयित्वा
हरेर्मूर्द्धि शंखतीर्थं धारयत् तुलसीपत्रसंमिश्रमपिबच्चरणोदकं २५ नैवेद्यं तुलसीमिश्रमश्नन्नभक्षयद्याप
हं प्रसादतुलसीमालाश्चैमिलः स्मरणे ततः २६ कीर्तयेत्तुलसीविष्णुं सदारस्तुलसीवने अतिष्ठतमाह
तेजाः संवत्सरमनन्यधीः २७ ततः संवत्सरस्यान्ते सदारस्तीर्थसत्तमे निमज्योन्मज्य सुखः सभार्यो यौवनं
गतः २८ तं दृष्ट्वा मंत्रिणस्ते च तस्य विस्मयमानसाः राजा तु तुलसीदेवीमेवमाराध्य यौवनं २९ आसवान्व
त्सरस्यान्ते लतो राजा गृहंगतः ततः सुशीलासुसुखी रेमे तं सुषुवे सुतं ३० यस्यनाम्नासुरविरक्तारतं वर्षमुच्यते
भुक्त्वाभोगान्सुरुचिरान्पुत्रं चावाप्य नृपतिः ३१ तुलस्यास्तु प्रसादेन मुक्त्वा राज्यमकंटकं वैकुंठलोकम
मलंभासवान्सभार्यया ३२ इतिश्रीपद्मपुराणे तुलसीमाहात्म्ये अष्टमोध्यायः ८ ७ ७ ऋषयऊचुः
श्रुतं नः सूतसकलं सत्त्वं मंगलात्मकं तुलस्याः कवचं दिव्यं वक्तुमर्हस्यशेषतः १ सूतउवाच पुराहतपु
ग विप्राः कैलासशिखरेमले तारकस्यवधार्थाय हलोद्योगस्त्वाभिर्भृत् २ भगवंतमुमानाथं पप्रच्छ प्रयतः शुचिः

स्कंदउवाच देवदेवजगन्नाथसर्वज्ञकरुणाकर १ येनश्रेयोभवेन्मह्यंतद्वदस्वकृपानिधे सेनापत्येनियुक्तोस्मिदे
३९ वैरिन्द्रमुखैःप्रभो ४ तारकस्यवधार्थायचंडवीर्यस्यशंकर नखलुमेनिश्चयश्शंभोनिहन्मिष्याम्यसुरंकथं ५ तारकस्य
वधार्थायचंडवीर्यस्यशंकर तारकःखलुदुष्टात्मामायावीबहुवीर्यवान् ओनित्यंबाधतेदेवान्सेन्द्रान्मामपिबाधते ६
स्पर्धतेसमयानित्यंसंग्रामेचंडविक्रमः सर्वाण्यस्त्राणिदिव्यानिससंहाराणिसर्वशः ८ बलेनयेनशौर्येणनहि
पश्यामितत्समं कथंहन्यामहेशंभोतपसाविक्रमेणवा ९ सर्वशास्त्रार्थकुशलोरथचर्याविशारदः यथाहंतुमया
शक्यस्तथाशिक्षयमांप्रभो १० पुत्रस्तवास्मिशिष्योस्मितथैवशरणागतः + बाहुयुद्धेमल्लयुद्धेराजनीतिशास्त्रकोविदः ११ +
देवकार्यरतश्चैवतस्मान्मयिकृपांकुरु १२ येनास्त्रेणाथशास्त्रेणमाययातपसाथवा बलेननीतिमार्गेणहन्यांदुष्टं
दितेःसुतं १३ शिवउवाच साधुपृष्टोस्मिनद्वंतेस्माभिस्तोस्मित्वयापुनः नमाययानशौर्येणतपसावानयेनवा १४
नकर्मणानशास्त्रेणतारकादधिकोभुवि तथापितारकंहंतायेनोपायेनतच्छृणु १५ युक्तोहंत्वद्धितेनिस्पंडउपायंव
च्मितद्धवे नवापिगुह्यंवक्तव्यंनान्यस्यतुकदाचन १६ तुलस्याःकवचंदिव्यंत्रिगुणजपपुत्रक उदीतभगव २९
त्यंकेततःशत्रून्वधिष्यसि १७ सर्वदेवेषुतीर्थेषुवेदेषुविविधेषुच यत्पुण्यंतदवाप्नोतितुलसीसंस्तवान्नरः १८
आयुरारोग्यमैश्वर्यंपुत्रक्षेमादिकंयशः राज्यंसंपदमाप्नोतिकृत्वाकवचमुत्तमं १९ शत्रुक्षयसुहृल्लाभमैश्वी
करंतुयशःपरं विद्यांविनयसंपत्तिंशांतिंभक्तिंजनार्दने २० कवचंतत्कृतोचैवलभतेपुरुषस्त्वितः ज्वराप
स्मारकुष्टादिमूत्रकृच्छ्रकफानिलान् २१ भूतप्रेतपिशाचांश्चविद्यांविजयतेनरः दुर्भिक्षेराजसंबाधेनदीनांचपरिप्लवे २२

राजकोपेचसंप्राप्तेजपन्क्षेममवाप्नुयात् पतिवश्यकरंस्त्रीणांनारीवश्यकरंनृणां २३ प्रजावश्यकरंराज्ञांद्विजा
नांसर्ववश्यकृत् तुलसीकवचस्यास्यश्रीहमेवऋषिस्वयं २४ अनुष्टुप्छंदइत्युक्तोतुलसीदेवतास्वयं योय
कामयतेतत्तत्प्राप्नोतिनिश्चितं २५ तुलसीश्रीमहादेवीनमःपंकजधारिणी दृशौमेपद्मनयनाश्रीसखीश्र
वणेमम २६ स्कंदेकस्तूरिणीपातुभुजौमेपापहारिणी २७ करौपद्मकरापातुहृदयंविष्णुवल्लभा पुण्यदाम
+जिव्हांमेपातुसुमुखाकंठंविद्यामयीमम+ ध्यमंपातुनाभिंसौभाग्यदायिनी २८ कटिंकुंडलिनीपातुऊरूनार
दवंदिता जननीजानुनीपातुजंघेसकलवंदिता २९ नारायणीप्रियापादौसर्वांगंसर्वपावनी संकटेविषमे
दुर्गेरिपोर्व्याघ्रेमहाभये ३० अग्निहोत्रसंध्ययोःपातुतुलसीसर्वदासदा इतीदंपरमंगुह्यंतुलस्याःकवचंशुभं ३१
मतानामभक्तत्वायभीतानामभयायच मोक्षायचमुमुक्षूणांधीकामानांश्रियेतथा ३२ विजयाययुयुत्सूनां
व्याधीनामरोगकृत् वश्यायवश्यकामानांविद्यायैवेदवादिनां ३३ द्रविणायदरिद्राणांपापीनांपापशांतये अन्ना
यक्षुधितानांचस्वर्गायस्वर्गगामिनां ३४ पशुभ्यःपशुकामानांपुत्रेभ्यःपुत्रकामिनां राज्यायभ्रष्टराज्यानामशां
तानांचशांतये ३५ भक्त्यर्थंविष्णुभक्तस्याविष्णोसर्वांतरात्मनि जप्यंत्रिवर्गसिध्यर्थंगृहस्थेनविशेषतः ३६
उद्यंतंचंडकिरणंउपस्थायकृतांजलिः तुलसीकाननेतिष्ठन्नासीनोवाजपेदिदं ३७ सर्वान्कामानवाप्नोतित
थैवममसन्निधौ ममप्रीतिकरंचैवहरिभक्तिविवर्द्धनं ३८ यास्याम्मृतप्रजानारीतस्याअंगंप्रमार्जयेत् सा
पुत्रंलभतेदीर्घंजीवनंचाप्यरोगिणी ३९ वंध्यायामार्जयेदंगंकुशैर्मंत्रेणसाधकः सापिसंवत्सरादेवगर्भंधत्तेमनोहरं ४०

२६ अभ्यस्येराजवन्नृपाथ्रतेजसोपितुखोरवेः पलशाम्लेविघाथीजेपदश्चेक्रुरूपभाक ४१ कन्यार्थीचंडिकागोरेगेहेश्च
तुक्षयेमम श्रीकामोविष्णुगेहेचउद्यानेश्रीवशांभवेत ४२ किमत्रबहुनोक्तेनश्रृणुसेनेशतत्वतः यंयंकामयतेको
मंतंतंप्राप्नोत्यसंशयं ४३ कुमारश्रृणुचान्यत्तुतुलस्याः संहितांपरां ४३ तुलसीश्रीसखिशुभेपापहारिणिपु
ण्यदे नमस्तेनारदनुतेनारायणमनःप्रिये ४४ एनंमंत्रंजपन्कुर्वन्तारकेचंवधिष्यति नैतस्मात्तरंकिंचित्सिद्ध २६
सिद्धिप्रदंतव ४५ इहैवजन्मनिक्षिप्रंक्रूरोसिध्यत्ययंमनुः इतिगुह्यतमेनप्रोक्तंनवस्नेहेनपुत्रके ४६ नात्रता
याप्यक्लेशकायनाश्रद्धायमारामते नषठायछतघ्नाय नचाशुश्रूषवेसुत ४७ नचैवाशिष्यभक्तायनविष्णु
द्वेषिणेवदेत पठितंमन्यमानायवेदवाच्यंकथंचन ४८ वशीकरणविद्वेषसंहारोच्चाटनेतथा नातःपरतरंकिं
चित्क्षिप्रसिद्धिविधायकं ४९ संहारयन्निपुत्कोस्मिजगतांपुत्रदेवतेः अनेनमंत्रराजेनशीघ्रंमत्स्यौषिप्रघते ५०
संहाराम्यखिलंजगत ५० राजोपश्रामनंत्रात्रुक्षयंवादेजयंतथा अनेनमंत्रराजेनशीघ्रंमत्स्यौषिप्रघते ५१
विष्णुभक्तस्तुयोमर्त्योजपेन्मंत्रमनुत्तमं मोक्षविज्ञानसिद्धिस्तुतस्यहस्ततलेस्थिता ५२ बहुनात्रकिमुक्तेनसर्वे
सिद्धिर्भविष्यति तारकस्यवधार्थायतस्मात्त्वंजपपुत्रके ५३ सूतउवाच श्रुत्वैतद्वचनंमंन्यमानोयंदेवस्यत्रि
पुरहरस्यवाक्लिरेतोः तज्जस्वात्क्षणमवधीच्चतारकाख्यंसत्रिदशपतिर्ययादिवंप्रविष्टः ५४ इतिश्रीपद्मपुरा
णेतुलसीमाहात्म्येनवमोध्यायः ९ ७ सूतउवाच अपरांचपुरावृत्तंतुलसीगोरयाश्रयं सर्वपापक्षयकरंस
र्वसंपत्प्रदायकं १ छच्छा(स्को)प्र द्विजःश्रेष्ठ कश्चिन्मूर्खोनादत्तसत्क्रियः सकदाचित्तुलाशार्थंभूयस्सर्यूषिलाशनैः २

प्रातर्गतो रविंभूमिं संछिद्य तृणसंचयं अमन्न्यथ मात्रा रक्षार्थं ददर्श तुलसीवनं ३ पुण्यं हरिचनं श्यामं कोमलं
सुमनोहरं सोऽचिंतयत्संस्पृहोऽथ यदि मे स्यां सवेदियं ४ स्वाधीनगवांतु तुलसी यदि तर्ह्यहं राम्यहं अथाप्यलं गृहीचै
नां दास्याम्यधैतदर्थिनः ५ मत्सार्थं स्वगृहस्थाय किमर्थं वासहीच्छसि ६ तस्मिन्नंतरे तस्य देवात्स्वर्णायुषोंतिकं ६
आगत्य पुनरुक्तं तु स्त्र मम स्यात्परम किंकराः दर्शनमात्तुलसी हि सर्वध्यायं द्विजाधमः ७ न स्पृशो तुलसी यावदसाध्य
सुदीर्ते भवेत् इत्याश्रु चोदितं सर्पमायांतं सो विशन्नपि ८ अग्राह तुलसी पूर्वमारादेव बलान्वितः ततः कुतश्चिद
गतः ॰ विष्णोश्चक्रं सुदर्शनं ९ अदृष्टमेव तं यातं सर्वतो दरमन्वगात् अथाप्यतिसत्तो गत्वा तृणभारांतरा विप्रान् १०
हं तु तु तुलसीत्यागयम भस्यास्तमन्वयुः द्विजोप्यज्ञानवत्त्वात् पलाय्य तां सो हि मुद्गलन् ११ गृहमागाज्वलच्चक्रैर्भी
तैर्दूराद्ततैर्भटैः तस्याश्चर्यमथो दृष्ट्वा गृहद्वारे संदिव्यदृक् १२ लक्ष्यार्चको यदर्थं सा तुलसी तेन संचिता १३
कौतुकात्स च्छते तस्मै प्रणम्याहुर्यमानुगाः स्वागतं तस्य चक्रेण रक्षितो चुः स्वकारणं १४ स्कंधभारं नातो वि
प्रं त्यजंतं तुलसीमपि सर्पदृष्ट्यमं पश्यान्नयामो यममंदिरं १५ ततोऽस्य दयया विप्रा रक्षोपायमचिंतयत्
ततो ज्ञानीच समुतैः प्रीत्या चाहांतकानुगान् १६ अहो लतोस्य विप्रस्य रक्षोपायं यमानुगाः मत्येन तुलसीत्या
गरक्षच्चक्रं द्विजं क्षयं १७ उत्तमं चक्रिरक्षके द्रेमे स्त्रीत्यास्य स्यरेभयं मदर्थं ने तु तुलसी रक्षतेनन्तोऽस्मिवः १८
अथोचुः श्रेनरा दूतानां केमस्य स्यरयाविभो स्मरोरवास्त्रयामो हि वयं वै यम किंकराः १९ इतो ईयामास्त्रागस्य
पूर्वमायुमतिस्वरैः हस्तस्थतुलसी येन सर्वतो रक्षितिक्षवं २० नित्यं सन्निहितो विष्णुः सस्पृहस्तुलसीवने ।

अपिमेपुत्रमेकंवाकश्चिदन्योर्पयेदिति २१ यदिस्त्रिलोयंतत्रैवश्रीशायायांसमर्पयेत् तर्हिचक्रंतदेवास्मा
न्नस्मीकुर्यान्नसंशयः २२ सुहृतीदुःहृतीवापितुलस्यांयोर्चयेद्धरिं देहांतेदिव्ययानेनविष्णुभक्तैःसनीयते २३
 तस्मादितितंजानीमस्तुलस्यास्तुप्रियोहरिः गच्छंतंतुलसीहस्तंरक्षंतंनैवगच्छति २४ अघेषुसर्वेथारामस्त्वया
तर्हिसहैतंतया दीयतांतुलसीपूजापूर्णायुःस्याद्ध्रुवं २५ इत्युक्तोथतथाकृत्वासोरुस्तंद्विजंमुदा याम्या
श्चाटालतोजग्मुस्तयोःसर्वंप्रपश्यतोः २६ बोधयित्वाद्विजंम्रुखंस्वस्थलेनैववैवस्वतः सगत्वावैस्ववसेत्रंतुलस्यैवा
र्चयेद्धरिं २७ अभितोलोपरांसिद्धिंआगतोनमेवैष्णवो तुलसीकाननंयत्रगृहेतिष्ठतिनिस्पृशः २८ तद्गृहं
तीर्थरूपंहिनायांतियमकिंकराः दर्शनंनर्मदायाश्चगंगास्नानंतथैवच २९ तुलसीदलसंस्पर्शःसममेतत्त्र
यंस्मृतं रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनादपि ३० तुलसीदह्यतेपापंवाङ्मनःकायसंचितं पक्षेपक्षे
चसंप्राप्तेद्वादश्यांमुनिसत्तम ३१ ब्रह्मादयोपिकुर्वंतितुलसीपूजनंमुदा मणिकांचनपुष्पाणितथामुक्तावैडू
र्यकाणिच ३२ तुलसीपत्रदानस्यकलांनार्हंतिषोडशीं सहस्रमारोपणतःपिप्पलानांशतेनच ३३ यत्फलं
चतदेकेनतुलसीरोपणाद्भवेत् विष्णुपूजनसंसक्तस्तुलसीयस्तुपूजयेत् ३४ सरोपकोविष्णुगृहेमोदतेदेववच्चिरं।
तुलसीमंजरीभिर्यःकुर्याद्धरिहरार्चनं ३५ नसगर्भमवाप्नोतिमुक्तिभागीनसंशयः पुष्करादीनितीर्थानिगंगा
दिसरितस्तथा ३६ वासुदेवादयोदेवावसंतितुलसीदले आरोप्यतुलसींदेवींसंपूज्यतुलसीवनं ३७ वसंतिमोदमानाश्चयत्रस्वब्रह्मा
हुर्भुजः एककालंद्विकालंवात्रिकालंवापियोनरः ३८ संपूज्यतुलसींदेवींकृतकृत्योभविष्यति ३९ इतिश्रीपाद्मेतुलसीमाहात्म्योध्यायः ४०

नारदउवाच यरोप्यतेयेनविधिनापूज्यतेतुलसीसदा तमाचक्ष्वमहादेवममानुग्रहकारणात् १ महादेवउवाच
शुभेपक्षेशुभेवारेशुभेऋक्षेशुभोदये केशवार्थंशुभांशेचरोपयेत्तुलसीवनं २ गृहस्यांगणमध्येवागृहस्योपवने
पिवा शुचौदेशेचतुलसीमर्चयेद्बुद्धिमान्नरः ३ मूलेचवेदिकांकुर्यादालवालसमन्वितां प्रातःसंध्याविधिंकृत्वा
स्नात्वापूर्वंदिनेदिने ४ गायत्र्यष्टशतंजप्त्वातुलसींपूजयेत्ततः प्राङ्मुखोवाउदङ्मुखोवापिस्थित्वाप्रयतमानसः ५
ध्यायेच्चतुलसीदेवीश्यामांकमललोचनां प्रसन्नांपद्मकह्लारवराभयचतुर्भुजां ६ किरीटहारकेयूरकुंडला
दिसमन्वितां ७ धवलांशुकसंयुक्तांपद्मासननिषेदुषी ८ ध्यानं देविंत्रैलोक्यजननीसर्वलोकैकपावनी आग
च्छभगवत्यत्रप्रसीदतुलसीप्रिये ९ आवाहनं सर्वदेवमयेदेविविष्णुर्हरिप्रिये देविस्वर्णमयंदिव्यंगृहाणा
सनमव्ययं इत्यासनं १० सर्वदेवमयाकारेसर्वदेवनमस्कृते दत्तंपाद्यंगृहाणेदंतुलसीत्वंप्रसीदमे ११ सर्व
तीर्थमयाकारेसर्वतीर्थनिषेविते इदमर्घ्यंगृहाणत्वंदेविदेत्यांतकप्रिये १२ सर्वलोकस्यरक्षार्थंसदासन्निधि
कारिणी गृहाणतुलसीप्रीत्याइदमाचमनीयकं १३ गंगादिभ्योनदीभ्यश्चसमानीतमिदंजलं स्नानार्थंतुलसी
स्वच्छंप्रीत्यात्वंप्रतिगृह्यतां १४ क्षीरोदमथनोद्भूतेचंद्रलक्ष्म्यासहोदरे गृह्यतांपरिधानार्थंइदंक्षौमांबरंशुभे १५
श्रीखंडंकेकुंकुमंदिव्यंकर्पूरागरुसंयुतं कल्पितंतेमहादेवीप्रीत्यर्थंप्रतिगृह्यतां १६ नीलोत्पलंसुकल्हारमा
लत्यादीनिशोभने पुष्पाणिगंधवंतीशेतुलसीप्रतिगृह्यतां १७ पद्मनाभप्रियेदेविसुरासुरनिषेविते जगन्मा
तस्तुलसिमेअक्षताप्रतिगृह्यतां १८ धूपंगृहाणदेवेशिमनोहारिसुगुग्गुलं आज्यमिश्रंचतुलसी भक्ताभीष्टप्रदायिनी १९

अज्ञानतिमिरांधस्य ज्ञानदीपप्रदीपिनी तथैव तुलसीप्रीत्या दीपोयं प्रतिगृह्यतां २० नमस्ते जगतां नाथे प्राणी
नां प्रियदर्शने सुकल्पितं मया भक्त्या नैवेद्यं प्रतिगृह्यतां २१ नमो भगवति श्रेष्ठे नारायणि जगत्प्रिये सीतलं नि
र्मलं नीरं तृप्त्यर्थं प्रतिगृह्यतां २२ अमृते अमृतसंभूते तुलस्यामृतरूपिणी कर्पूरादिसमायुक्तं तांबूलं प्रतिगृह्य
तां २३ हरिप्रिये दक्षिणकरे स्वभक्तानां प्रियंकरे पोषितामेकलावण्यदक्षिणा प्रतिगृह्यतां २४ मयाचयानि
पापानि कृतान्यनंतजन्मसु प्रदक्षिणाविनाशानि तान्वंवसुकुरु २५ प्रसीद मम देवेशि कृपया परया
सदा अभीष्टफलसिध्यर्थं कुरु मे माधवप्रिये इति प्रार्थना २६ अनया पूजया पूर्वं कलिंगाधिपतेः सुता का
मिन्यावयवैर्युक्तामकर्कटास्याभ्यगनिंदया २७ पूर्णमब्दत्रिकालं तु एभिर्मंत्रैः सुपूजिता तुलसी पूजयामास पूर्णचं
द्रमुखी बभौ २८ इति श्रीपद्मपुराणे तुलसीमाहात्म्ये एकादशोध्यायः ११ ७ अथ यदुच्यते शतानंद
महाप्राज्ञ सर्वशास्त्रविशारद नामोच्चारे कृते यस्याः प्रीणान्करगसर्पहा १ पापानि विलयं यांति पुण्यराशिश्च
वर्द्धते सा कथं तुलसी लोके पूज्यते वंद्यतेपि च २ पप्रोस लोद्विजातीनां आधिक्यं केन हेतुना सर्वैर्वंदस्वभ
गवन्माहात्म्यं तुलसीभवं ३ शतानंद उ० साधु पृष्टं महाभाग तुलसीसंभवं फलं दर्शनेनापि यस्याः पापौ
सहस्रफलं भवेत् ४ अयतां चैव माहात्म्यं मायुश्रीबलवर्द्धनं स्कंदमुद्दिश्य यत्प्रोक्तं मीश्वरेण महात्मना ५
पुरा नारायणो देवः क्षीरार्णवनिकेतनः क्षीरोदमथनोद्भूतः कल्पवृक्षस्य गोस्तथा ६ ऐरावतं च नागेंद्रमुच्चैःश्रवस
मेव च कौस्तुभं च महाभाग लक्ष्मी सोमं तथामृतं ७ अमृतस्योद्भवं दृष्ट्वा कृपयामुदितो हरिः हरेरानंदवाष्पं तु क

लशेन्यपतत्तदा ८ तत्रोत्पन्ना च तुलसी नाम्ना हरिवल्लभा पश्चात्तु पुंडरीकाक्षः सर्वेषां च दिवौकसां ९
व्यभजद्वै यथान्यायं कल्पवृक्षादिकान्हरिः तुलसीं कौस्तुभं लक्ष्मीं स्वयमेव गृहीतवान् १० श्रियं कौस्तुभरत्नं च हृ
र्दिवक्षस्यधारयत् आपादमौलिपर्यंतं तुलसीमावहत्प्रभुः ११ हरिरुवाच दर्शनाच्चैव कल्याणि परं कौतूहलं हि
मे वरं वृणीष्व भद्रं ते यत्ते मनसि वर्त्तते १२ तुलस्युवाच देवदेव जगन्नाथ सर्वदेवनमस्कृत मय्येवास्तु देवे ति
शश्रीतिस्तव महेश्वर १३ श्रुत्वेमं वचनं नाथ ममाप्यस्तु दृढा तदा त्वत्प्रसादप्रभक्तिर्वै भवेयं सर्वपावनी १४
पूजनात्सालनात्सेकाद्दर्शनात्स्पर्शनात्तथा नामग्रहणाच्चापि प्रदक्षिणनमस्कृतैः १५ स्मरणाद्धारणाद्वापि सर्वतापक्ष
यः पृथक् सर्वपापक्षयश्चापि पुण्यवृद्धिर्भवेत्तदा १६ मम शुश्रूषयादेव मुक्तिर्भवतु शाश्वती महापापातिपापानि
चादिपापानि कर्मणा मनसा गिरा १७ उपपादिकानि कार्याणि दर्शनात्स्पर्शनादपि अंतकाले च मत्पत्रं भक्षयेद्यदि पापकृत् १८
तव सायुज्यमायातु सत्यमस्त्वाति विरह्ये मत्पत्रैर्मंजरीभिर्वा कुसुमैर्मिश्रितैस्तथा १९ त्वत्पादपद्मयोः पूजां चरे
येत्सततं नरः मत्प्रीत्या तस्य देवेश अक्षयं च पदमव्ययं २० इत्युक्त्वा तं सुरेशानं तूष्णीमासीत्प्रसन्नधीः श्रीभगवानु०
तथा भवतु कल्याणि सर्वं तव मनोगतं २१ ममाप्यसमतं देवी मुक्तिदा त्वं हि देहिनां कल्हारं वाथ पद्मं वा मालतीं
चंपकादिकं २२ कैरवं मल्लिकां वाथ शतपत्रोत्पलादिकं सुवर्णेन कृतं पुष्पं राजतं रत्ननिर्मितं २३ मौक्तिकं
वापि पूजायां यद्यपि हि मम प्रियं सर्वेभ्यश्चैव पत्रेभ्यः पुष्पेभ्यः फलितोपि वा २४ त्वन्मंजरीभिः पत्रैश्च पूजा मत्प्रीति
कारिणी शालग्रामे कृता या तु तां विना नाथ मम प्रिया २५ नैवेद्यादि मया तत्र न ग्राह्यं त्वां विना नघे भुक्तं पर्युषितं

वापि श्रीसेत्वद्दलमर्चने २६ नलभ्यते यदा तत्र निर्माल्यमपि दीयते प्रक्षाल्य तव काष्ठस्य चंदनं वापि मृत्तिकां २७
अथवा तुलसीशाखमुत्सार्य खलु मां यजेत् सीदार्णवे च वैकुंठे हरिक्षेत्रे च नैमिषे २८ गोब्राह्मणानां हृदये सूर्य
२० मंडलमध्यतः नव मूले च सततं च सम्भिंचते तो नरैः २९ तस्मात्त्वद्दलैः पूजां मम श्रीसे नान्यथा क्वचित् देवो वा मा
नुषो वापि किंनरो वापि सुंदरी ३० त्वयि भक्तिविहीनश्चेन्मे भक्तः सर्वे भवेत् इत्युक्त्वा पुंडरीकाक्षः सर्वेषामे २०
व पश्यतां ३१ तुलसीमनुगृह्यैसं तत्रैवांतर्दधे हरिः तस्मात्सर्वप्रयत्नेन तुलसीं सेवयान्नरः ३२ विशुद्धः स
र्वपापेभ्यो विष्णुसायुज्यमाप्नुयात् ३३॥ इति श्रीपद्मपुराणे तुलसीमाहात्म्ये द्वादशोध्यायः १२ सूत उवाच
शृण्वंतु ऋषयः सर्वे माहात्म्यं तुलसीगतं यस्याः कीर्त्तनमात्रेण प्रीतो भवति केशवः १ सिता वाप्यसिता वापि तुल
सी विष्णुवल्लभा ललाटे धारयेद्यो वै तुलसीमूलमृत्तिकां २ दशाश्वमेधजं पुण्यं संप्राप्नोति न संशयः तुलसीभ
क्षणे नैव चांद्रायणशताधिकं ३ तस्मात्कार्ये विशुद्ध्यर्थं भक्षयेत् तुलसीं बुधः धन्यास्ते मानवा लोके येषां संप
श्यते कलौ ४ शालग्रामशिला तीर्थं तुलसीदलमिश्रितं तुलसीं ये विचिन्वंति धन्यास्ते करपल्लवाः ५ केश
वाराधनार्थं ये रोपयंति कलौ नराः ते पुण्यपदहीनो लोके प्रयांत्यंते हरेः पदं ६ तुलसीवनसंपर्करजसा शुचि
शुध्यति किंकरिष्यति संक्रुद्धो यमोपि सहकिंकरैः ७ तुलसीदलेन देवेशं पूजयंतीह ये नराः गंगास्नानफ
लं नित्यं तेषां भवति चास्य ८ मातृशुश्रूषणरताः पितृसेवापरायणाः तुलसीपालनपरास्ते यांति परमं पदं ९
दुर्लभा पतिशुश्रूषा दुर्लभं विष्णुपूजनं दुर्लभा तुलसीपूजा दुर्लभा प्राणिनां दया १० दुर्लभं रामचरितं दुर्लभा सत्कथा रतिः

स्नानेदानेजपेहोमेप्रधानेकेशवार्चने ११ तुलसीहरतेपापंधृतासंकीर्त्तितापिवा तुलस्यमृतसंभूतेसदात्वंकेश
वप्रिये १२ केशवार्थंविचिन्वामिवरदाभवशोभने १३ मोक्षैकहेतुर्धरणिप्रसूतेविष्णोःसमस्तस्यगुरोःप्रियेते
आराधनार्थंतुदलंभवंस्यालुनाम्मितन्मेतुलसीक्षमस्व १४ मंत्रेणानेनसंग्रह्यतुलसीदलमुत्तमं वासुदेवस्यसंश
उपलभतेवैस्तवंपदं १५ प्रभावंतववदेवेशिगायंतिसुरसत्तमाः मुनयःसिद्धगंधर्वापातालेपन्नगेश्वराः १६ नते
प्रभावंजानंतिदेवाःपद्मप्रियाहते गुणानांपरिमाणंचस्वर्गेपिचिद्धोरपि १७ नशक्यंतेपरिज्ञातुंदेवेन्द्रैरपिव
त्कृते त्वमसंत्रेमंजरीभिश्चपूजयाम्यित्याहरी १८ तथाकृष्णाविप्रमेता तोयास्येपरांगतिं रोपितागोमतीतीरेस्वयं
कृष्णेनपालिता १९ जगद्धितायतुलसीगोपीनांसुखहेतवे वृंदावनेचरमतारोपिताविष्णुनास्वयं २० गोकुलस्या
भिवृध्यर्थंकंसस्यनिधनायच वसिष्ठवचनात्सर्वरामेणसरयूतटे २१ राक्षसानांवधार्थायरोपितात्वंहरिप्रिये
प्रयागेवसतानित्यंमाधवस्यचपूजने २२ पालितात्वंप्रियादेव्यागंगाजलसमीपतः सर्वाभिर्देवपत्नीभिःकिन्नरीभिश्च
नंदिले २३ स्वर्गेपिमंगलार्थायरोपितासिहरिप्रिये धर्मारण्येगयायांतुरोपितापितृभिःस्वयं २४ रोपितारघुनाथे
नलक्ष्मणेनचसेविता सीतयापालितात्वंस्यांदेवीत्वंदंडकानने २५ त्रैलोक्यपावनीगंगायथासर्वत्रगीयते
तथैवतुलसीदेविगीयसेसचराचरे २६ ऋष्यमूकेपिवसताकपिराजेनसेविता तुलसीवालिनाशायप्रियायाःसं
गमायच २७ प्रणम्यतुलसीदेवींमुद्धंप्यसमर्पितांपतिं कृतकार्यःप्रहृष्टःसन्हनुमान्पुनरागतः २८ तुलसीकान
नंदृष्ट्वाविद्रूयांतिपापकुलं सर्वथामुनिशार्दूलतस्यपापक्षयोभवेत् २९ तुलसीपत्रसंमिश्रंपत्तोयंशिरसिवहेत

सगंगास्नानजं पुण्यं प्राप्यते नुफलं लभेत् २० तुलसीग्रहणं शस्तं विष्णोरर्चनहेतवे आसुरीयोनिमाप्नोति द्वादश्वा
गृहेणैव तु २१ स्वार्जितं चोत्तमं पुण्यं मध्यमं सं च मुच्यते अधमं तु क्रयक्रीतं पारक्यं तदधमाधमं २२ देवालये निजु
पस्तं तु हंति पुण्यं पुराकृतं तस्मात्सर्वप्रयत्नेन देवोद्यानानि वर्जयेत् २३ हस्तेनानीतपत्राणी तुलस्यायं पतितमेव च दे
२९ वालयोद्भवं पत्रं गृहे देवाय नाहरेत् २४ तुलसीकानने यस्तु श्राद्धं च कुरुते नरः गयाश्राद्धकृतं तेन विष्णुना भाषितं पुरा २५
यत्पापं यौवने बाल्ये कौमारे जरसी कृतं तत्सर्वं विलयं याति तुलसीवनसेवनात् २६ शांतिमायाति देवेशस्तुष्टो लक्ष्मी
प्रयच्छति २७ इति श्रीपद्मपुराणे तुलसीमाहात्म्ये त्रयोदशोध्यायः १३ ७ मरीचिरुवाच तुलसीपत्रमाहात्म्यं २०
श्रोतुमिच्छामि तत्वतः कथं त्रैलोक्यनाथस्य सघप्रीतिकरं भवेत् १ ७ गरुड उवाच श्रूयतां मुनिशार्दूल भाषितं हरि
णा पुरा तुलसीपुण्यकथनं नारदाय महात्मने २ ममापि हरिणा प्रोक्तं पश्चाद्देवर्षिणं प्रति परमं महिमानं तच्छृणुयत्नतो
विप्रसत्तम ३ तुलसीदलमाहात्म्यं शृणुयाद्यः समाहितः तेनाधीतं कृतं तेन सर्वं च समनुष्ठितं ४ वृंदावनं य
कुरुते तुलस्या भक्तिसंयुतः अथवा कारयेदन्यैस्तस्मै निगदतः शृणु ५ तुलसीस्थानसंकल्पमात्रादेव च मा
नवः जन्मत्रयार्जितैः पापैः सक्षणादेव मुच्यते ६ यो नरस्तुलसीसम्पर्कसंस्थाप्यापि विवर्धयेत् स सप्तकुलसंयु
क्तो विष्णुसायुज्यमाप्नुयात् ७ तुलसीदलसंपृक्तं क्षीयते मस्तके जलं तस्य तस्याः सफलं जन्म तन्मे निगदतः शृणु ८
गंगादिसर्वतीर्थेषु स्नानाद्यत्फलमुच्यते तत्फलं समवाप्नोति मधुश्रीसन स्नानात् ९ करे यस्तु तुलसीपत्रं धार
येन्मृतिमान्नरः स तु ब्रह्मपुरं प्राप्य मोदते ब्रह्मणः चिरात् १० जन्मत्रयार्जितं पापं हि तौ स्वर्गं निहीयते दधात्तु तुल

सीपत्रं भक्त्या विष्णोः समाहितः ११ नरः सायुज्यमाप्नोति तस्य विष्णोर्जगत्पतेः हेमपुष्पसहस्रेण योऽर्चयेद्वत्सरं हरिं १२
तुलसीपत्रमात्रस्य कलां नार्हति षोडशीं तुलसीमालया विष्णुमर्चयेद्यस्तु पर्वसु १३ तस्य पुण्यफलं वक्तुं कः शक्तो भु
वि वा दिवि तुलसीकाननं यस्तु करोति द्विजसत्तमः १४ द्वादशादित्यसंकाशे विमाने दिवि मोदते द्वादश्यां तुलसीपत्रैः
यः पूजां कुरुते हरेः १५ अलंकृतं तु सौवर्णविमानमधिरोहति १६ ललाटे धारयेद्यस्तु तुलसीमूलमृत्तिकां तत्रै
व नेत्रे शिरसि कण्ठे च कर्णस्य धारयेत् १६ कार्त्तिके शुक्लद्वादश्यां यः कृष्णमधुसूदनं नैतानुकुरुते पूजां तुलस्यास्तु
पुष्पैः १७ अतीतजन्मसाहस्रे यत्कृतं पापसंचयं तत्सर्वं सहसा दग्ध्वा परं सायुज्यमाप्नुयात् १८ परेणा लंघि
तं पुण्यं तुलसीकाननं गृहे दृष्ट्वानुमोदते विष्णुसायुज्यं प्राप्नुयान्नरः १९ महापातकयुक्तोपि तुलसीपत्रभक्षणात्
स एव विशुद्धात्मा जायते नात्र संशयः २० तुलसीदलसंमिश्रमुदकं प्राशयेद्यदि सकुलत्रयसंयुक्तो विष्णोः सा
युज्यमाप्नुयात् २१ तुलसीकाननस्यार्थं प्राकारं यस्तु कारयेत् कंटकावरणं वापि तन्मे निगदतः शृणु २२ याव
द्दिनानि लद्रंतिष्ठ सम्यग्गृहं भुवि तावद्युगसहस्राणि विष्णुलोके महीयते २३ तुलसीदलजालानि छिंघाद्यु
स्तु तृणानि यः तेन दग्धानि पापानि दग्धानि नियतः स्वयं २४ एकं कुंभोदकं वापि मोक्षयेत्तुलसीवने तस्यैव स
र्वे पितरः सानंदास्तृप्तिमाप्नुयुः २५ शृणु ब्रह्मन्मुने चित्रं तुलसीमहिमाद्भुतं वक्तुं वर्षशतेनापि नैव कोपि विशक्यते २६
इतिहासमिमं पुण्यं शृणुष्व सुसमाहितः विष्णुनारदयोरक्षीये च द्विजसत्तम २७ कश्चित्स्फुटसमाचारः प्राणिनामं
तकोपमः विचचार महाराज्ये रौद्रकर्मा मगधेतकः २८ न संति तस्य मित्राणि न प्रियाणि न बांधवाः जनैः सर्वैः परित्यक्तो कांता

रविचचारह २९ सवागुरिकसंयुक्तो धानुष्मान्लुब्धकानने ततः श्रमधापरिक्रांतो वृक्षमूलमुपाययौ ३० क्षुधा
र्दीनवदनोशुष्ककंठोष्ठतालुकः चिंत्यमानकलत्रं च धनमेनेस्वसुखं तदा ३१ पंडितोवापिमूर्खोवाक्षुधितोवा
२१ तुरोपिवा संसारचिंतासक्तस्य स्वसुखंनावबुध्यते ३२ कुटुंबचिंतापरिभूरितस्यस्वदेहबोन्यापितस्करवाग्नि शि २१
दावाग्निदग्धस्य शरीरिणस्तुसंसारतापस्तुलितोनलोभवेत् ३३ संचारीतेमयारण्येमृगोनासादितोधुना कल
त्रंम्रियते तत्र बनेक्षुत्सकोमीयाम्यहं ३४ मतेममा अविज्ञाते कोलारे जंबुकोदराः मदुहंभक्षयिष्यंति मांनपश्यंति बांध
वाः ३५ क्षीयमाणबलश्चाहं किंकरोमीत्यरोदयत् तदेवलुब्धकोदुःखीददर्शमृगमंतिके ३६ तं दृष्ट्वा शरतांकिंचि
त्स्वस्थचित्तोथलुब्धकः तस्मा घोरशंकितमनाः श्चादधे धनुरात्ततं ३७ करालकर्मिणं व्याधं नीरीक्ष्य चकितो मृगाः
विवेशविपिनं त्यक्त्वाभीत्या तुलुलसीवनं ३८ तिरश्चामपितुलसीनां सर्वपापक्षयावहं स्वस्य पुण्यप्रभावेन पुण्यभू
मीरवाप्यते ३९ येनयथाकृतं कर्मशुभं वाशुभमेव वा सतत्रैवेध्वारज्वेव बलाद्दैवेननीयते ४० ततो विव्याध बाणे
नत्रस्तं तंलुब्धको मृगं ततोदैवात्सुराज्ञा घातसघः प्रस्फुरन्मृगं ४१ भूणुअस्मिन्मुने चित्रंसंप्राप्तोपिचदुर्गमं तु
लसीवनसंयोगाद्दिव्यदेहः परित्रजितः ४२ ततस्तन्मांसमादाय लुब्धको हृष्टमानसः न्यवर्त्तत गृहं गंतुं कलत्रं
चिंतयन्पथो ४३ ततोद्भवाग्निसंभूतोदशाहयनमुत्थितं सोपितेनैव निर्दग्धो ममार पिशिताशनः ४४ मृगां
लकेमृते तस्मिन्नाययुर्यमकिंकराः सारमेयसमैर्युक्ताः खङ्गतोमरपाणयः ४५ करालदंष्ट्रावदनाः करालाद्भुत
दर्शनाः चुक्रुशे लुब्धकोदृष्ट्वापाशहस्तांश्चनिर्भयान् ४६ अतिदीर्घोर्ध्वलोमान्वतराजिसमप्रभान् ।।६७

प्रज्वलद्दंष्ट्रवदनानंगारोपमलोचनान् ४७ तर्जयंतश्चतेसर्वेलुब्धकंपाशपाणयः केचित्तंताडयामासुःस्तु
ब्धकंतेतुसुघनाः ४८ यमांतिकंयमभटाःबबंधुश्चतथापरे तत्रांतरेजगन्नाथःसंसारार्णवतारकः ४९ सर्वपापप्रश
मकरोदयालुर्भक्तवत्सलः आनयध्वंव्याधमितिस्वदूतान्हरिरादिशत् ५० आययुश्चतदातीव्रवैकुंठाविष्णुतत्पराः 1
प्यातयंतोदिशःसर्वामार्तंडसमतेजसः ५१ किरीटिनश्चतरुणाःकीर्तयंतोहरेर्गुणान् तान्दृष्ट्वायमदूतास्तेतेजोहृ
तामयान्विताः ५२ विहायलुब्धकंदीनंकिंचिद्दूरंप्रदुद्रुवुः भयानकंलुब्धकंतंआश्वस्यहरिकिंकराः ५३ मेघगं
भीरनादेनतानूचुर्यमकिंकरान् विष्णुदूताउ० भोभोयमभटायूयंविचारेणविवर्जिताः ५४ निःपापमेनंपुरुषंमुंच
ध्वंमाविलंबयन् यमदूताऊचुः किंदेवाउपदेवावासौम्याःशांतरजोमयः किमर्थंधर्मराजस्यकिंकरान्नोनिषेधथ ४
कदाचिदपिनोनाथोनाधर्मैरमलप्रभुः सक्तिसर्वसमःशुद्धस्तदाज्ञाकारिणोवयं ५५ असावतीवपापीयान्किंसकःपुरु
षाधमः तस्मादनंतुनेष्यामोधर्मराजस्यसन्निधिं ५६ देवदूताउ० अलोकधर्मदृशामधर्मःस्यात्तेमहान् अविचा
रःसमस्तानांपापानांकारणंपरं ५७ यद्यत्कर्मनरःश्रेष्ठःसमाचरतिनिश्चयाः तत्तदाचरतेलोकोतस्मात्प्रामाण्यमेवयन्
व ५८ अहोयमभटाःयूयंयुष्मच्चकिमनुष्ठितं स्वापिद्यायानतोघोरेविचारयथदुष्कृतं ५९ कुर्वंतुपापपुरुषपापयो
ग्यंचशासनं समुपेक्ष्यचपापिष्टंकदामोक्षमवाप्स्यथ ६० यूयंधर्माधिराजस्यकिंकरायदिधार्मिकाः अतधर्मस्यत
त्त्वंस्वगिरानारकाभये ६१ इत्युक्तोविष्णुदूतैस्तेविज्ञाययमकिंकराः यमप्रणीतवाक्यानिस्मृत्वाक्रोधसमन्वि
ताः ६२ यमदूताऊचुः वेदप्रणीहितोधर्मोह्यधर्मस्तद्विपर्ययः वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुमः ६३

केवलं ये जगन्नाथमनंतं समुपाश्रिताः अस्माभिरपरित्याज्या नैषां तैः पापसंस्थितिः ६४ ते तु भागवता लोके तच्चि ना
त्तास्तत्परायणाः पूजयंति सदा विष्णुं ते न त्याज्याः सुदूरतः ६५ यस्तिष्ठन्प्रस्वपन्भुंजन्नुत्तिष्ठंश्चलितोपि सन् संकीर्त
२२ यति गोविंदं स नस्त्याज्यः सुदूरतः ६६ नित्यनैमित्तिकैर्देवं ये यजंते जनार्दनं अस्माभिर्नोवलोक्यास्ते तद्भक्तिहत
त्तिनो गतिः ६७ ये स्तुतं पत्रपुष्पैश्च धूपदीपैश्च पितुर्लभैः अर्चयंति न ते ग्राह्याः नराः केशवाश्रयान्विताः ६८ उपलेपं २२
च कर्त्तारः संमार्जनकरास्तथा हरिसद्मनि संत्याज्यास्तेषां त्रिपुरुषं कुलं ६९ येनवायतनं विष्णोः कारयंति कुलोद्भवाः १
पुंसां शालं नावलोक्यमस्माभिर्दुष्टचक्षुषा ७० येन वा भुवनं भक्त्या वासुदेवस्य कारितं नरा येन तत्कुलजमस्माभिः ७५
स्त्याज्यते सदा ७१ उदीरयति वा नाम विष्णोरमिततेजसः अस्माभिर्दूरतस्त्याज्यास्ते नरा विष्णुतत्पराः ७२ दीपं दं
दाघने वापि ते नरस्त्याज्याः सुदूरतः इत्युक्त्वा ते यमभटाः सर्वे प्रांजयस्तदा नमस्कृत्य महाविष्णुं तत्र तूष्णीम
तिष्ठत ७३ लुब्धकोपि च तान्धर्मान्श्रुत्वात्मानमचिंतयत धर्मेषु तेषु न मया न कृतोः केपि कुत्रचित ७४
चिरं कृतानुतापस्तु हरेर्नामोच्चदीरयन् विच्छिन्नसर्वबंधस्तु तच्छो विगतकल्मषः ७५ जनार्दनस्य यन्नाम पा
वनं परमं शुभं तस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ७६ योसौ बुध्या पापं कृत्वा संबोधितो नरः ततो
नुतापवान्विष्णोर्नामस्मृत्वा विशुध्यति ७७ कृत्वा पापान्यसंख्यानि अनुतापि भवेद्यदि प्रायश्चित्तं च तस्यैकं
हरेश्च स्मरणं परं ७८ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं न पुनंति सुराभांडं गंगाधा आपगा इव ७९ अथ
ते विष्णुदूतास्ते अब्रुवन्यमकिंकरान् युष्माभिः सत्यमेवोक्तं प्रपंचस्तं सुधर्मिकाः ८० किं तु अस्य विचाराणां त्रिपुरुषास्तु तदेवहि

इदं जगद्धाय ते तद्दुह्याहं नाभिलात्मभिः ८१ असावतीव पापोपि प्रविष्टस्तुलसीवनं तदैव सर्वपापेभ्यो विमुक्तो
नात्र संशयः ८२ महापातकयुक्तोपि तुलसीपत्रभक्षणात् सद्यः पापविशुद्धात्मा विष्णुसायुज्यमाप्नुयात् ८३ इत्यु
क्त्वा विष्णुदूतास्ते समादायाथ लुब्धकं विमाने स्थापयित्वा तु निन्युर्हरिमंदिरं ८४ लुब्धिलाय महद्दूतास्ते विविशुर्यम
मंदिरं ततस्तुलस्याप नामकीर्त्तनं चापि दर्शनं ८५ भक्षणं वंदनं चैव सर्वपापक्षयावहं ८६ इति श्रीपद्मपुराणे तुल
सीमाहात्म्ये चतुर्दशोऽध्यायः १४ गरुड उवाच इदं च शृणु विप्रेंद्र इतिहासं पुरातनं तस्य श्रवणमात्रेण सर्वपापं प्रण
श्यति १ पुरा कौचिद्द्विजवरौ तीर्थयात्रापरायणौ वरमेधसुमेधाख्यौ चेरतुः पृथिवीमिमां २ सर्वमेतामयायुक्तौ
सर्वतत्वार्थवेदिनौ गंगायात्राप्रसंगेन जग्मतुर्दिशमुत्तरां ३ गच्छतावेकदा विप्रौ कांतारं भ्रमविह्वलौ तुलसी
काननं तत्र ददृशातुरमंदिरौ ४ तयोः सुमेधा तद्दृष्ट्वा तुलसीकाननं महत् प्रदक्षिणीकृत्य तदा ववंदे भक्तिसंयुतः
दृष्ट्वा तद्वरमेधास्तु उवाच परया मुदा सोतु तुलस्या माहात्म्यं तमपृच्छत्सुनः पुनः ६ वरमेधा उवाच किमर्थं विप्र
देवेशा तीर्थेषु बहुषु स्थितौ स्थितेषु विप्रमुख्येषु प्रणाम क्लेतवान्द्विज ७ सुमेधोवाच शृणु विप्र महाभाग पुण्यं सा
स्वधुसुदीरितं आतपो बाधते आवां वक्ष्याम्यस्मिन्वटे द्विज ८ ततस्तौ विप्रशार्दूलौ मार्गान्नात्वापरिप्लुतं वटं निरंतरदलं ग
त्वा छायां समाश्रितौ ९ ततो वरद्दुरमेधा सुमेधा विगतश्रमः प्रणम्य देवदेवेशं मनसा परमेश्वरं १० सुमेधोवाच श्रूयतां
विप्र वक्ष्यामि तुलस्या उत्तमां कथां देवदेवप्रसादेन संजाता यां पयोनिधौ ११ पुरा दुर्वाससः शापात्कृतैश्वर्यः पुरंदरः
ममंथ क्षीरजलधिं सर्वदेवासुरैर्वृतः १२ ततस्तस्मान्निर्गतानि रत्नानि विविधानि च ऐरावतः कल्पतरुश्चंद्रमाः कमलालया १३

उच्चैःश्रवाः कौस्तुभस्तु तथा धन्वंतरिः स्वयं करांभ्यां कलशं विष्णुर्धारयन्नमृतं प्रभुः १४ हरीतक्याद्य
श्चान्य द्रव्याण्यौषधयस्तथा अजायन्त द्विजश्रेष्ठ लोके श्रेयो विधायकाः १५ ततः पीयूषकलशं जरामरणहा
२२ रिणत् प्रणम्य शिरसा विष्णुं ददौ धन्वंतरिः स्वयं १६ करांभ्यां कलशं विष्णुर्धारयन्नमृतस्य तं अवेक्ष्य सुमुदे दे २२
वाः पीतवासाश्चतुर्भुजः १७ तस्मिन्पीयूषकलशे नंदानंदाश्रुबिंदवः न्यपतंस्तेन तुलसी समजायत मंगला ४
सर्वलक्षणसंपन्नां सर्वाभरणभूषितां हरेर्लक्ष्मीरदृष्टेवा तुलसी चामृतोद्भवां १९ तुलसीमंकमारोप्य प्रसन्न
वदनो हरिः पुनर्हि लोकान्सकलानिति तस्य वरं ददौ २० ततो नीव प्रीयतरा तुलसी जगतां पतेः सर्वलोकेषु विप्रेन्द्र
पूज्या पूज्यतरा हि सा २१ तुलसीकाननं यत्र तत्र तिष्ठति केशवः तस्यां सुपूजितायां तु पूजितो भगवान्भवेत् २२
यस्तु श्रीतुलसीपत्रं विष्णोः शिरसि धारयेत् स हि देवगणैः सर्वैः पूज्यते विष्णुवत्सदा २३ नारायणो जगद्धाता तु
लसी प्राणवल्लभा सत्यमुक्तं मया यस्मात्तस्मादावां सरक्षतु २४ इत्येवं वदतस्तस्य सुमेधसो महात्मनः
आराद्दृश्यत महद्विमानं परमार्चितं २५ तदानस्माद्विटपिनौ निर्गतौ पुरुषावुभौ द्योतयंतौ दिशः सर्वाः सूर्य
साम्यसन्निभौ २६ सर्वाभरणसंपन्नौ सर्वलक्षणलक्षितौ मंदारमालां तरुणां धारयंतौ तथा गले २७
किरीटिनौ युवानौ तौ दिव्यांबरविभूषणौ प्रणामं चक्रतुस्तस्यै सुमेधावरमेधसौ २८ वरमेधसुमेधासौ

मनसाभ्ययमागतौ २९ उचतुर्विस्मयाविष्टौ तावुभौ देवसन्निभौ तौ ऊचतुः कौ युवां देवसंकाशौ भवंतौ मंगलरू
पिणौ ३० नमस्कारो न पोप्याप्तौ तावुभौ शुभरूपिणौ इत्युक्तौ ब्राह्मणाभ्यां तौ दिव्यरूपौ महाप्रभौ ३१ पुनः
प्रदक्षिणं कृत्वा नमस्कारं च चक्रतुः तयोर्ज्येष्ठ उवाचेदं प्रांजलिर्द्विजसन्निधौ ३२ युवामेव पिता माता आवयोश्च
तथा गुरुः सम्यक्प्रज्ञो न तथा वाभ्यां नमस्कार्यौ पुनः पुनः ३३ यत्प्रसादाद्विनिर्मुक्तो ब्रह्मशापाद्भयंकरात् अहं तु दे
वलोकस्य आस्तिको नाम नामतः ३४ अप्सरोगणसंयुक्तो भवे यं नंदने वने रमे रेवेव वनिता यथा कालमया
सह ३५ बहुकालविनालस्य नंदने शुभलक्षणे तदा मांगल्यमास्थाय पितुः शास्त्रानियोषितां ३६ ततः स्वभाव
युक्तस्य लोमशस्याश्रमे पुनः सद्यक्षालानि पुष्पाणि लोमशो मुनिसत्तमः ३७ चुकोप तस्य कोपाग्निर्ददाह गहनं म
हत् योषिद्भिस्तापराद्धेन तासां वै परतंत्रता ३८ अयं मे सुदुराचारः शापार्ह इति सोऽब्रवीत् संप्रहरासि सोऽस्य चाव
त्वं शोभवेत्विच ३९ अशापं लोमशमुनिः कांतोरविजनम्बिरं प्रसादितामया सोऽथ शापाद्इति सो व्यधात् ४०
प्रसन्न वर नोम्रत्वा रूपं च क्रमाला तपाः तुलसीपत्रमाला स्यां विष्णोर्नाम तथा द्विज ४१ यदा श्रेणोषि सघस्त्वं
विमुक्तिं यास्यसि ध्रुवं चत्प्रसादान्मुनिश्रेष्ठ मुक्तो जातोऽस्मि शापतः ४२ अयं मुनिवरः पूर्वं गुरुशुश्रूषणे रतः
गुरोराज्ञामनादृत्य ब्रह्मराक्षसतां गतः ४३ युष्मत्प्रसादादस्यापि ब्रह्मशापो विनिर्गतः तस्मा युवां महाभागौ पूज्यो पुण्यजनैः सदा ४४

स्नातीर्थयात्राफलंतस्यैयुवाभ्यांइतिहासतः उत्तरत्रापिपुण्यानिवर्द्धयंतिदिनेदिने ४५ गंगायात्राप्रसंगेनचरंतो
पृथिवीमिमां युवामेवमाहात्म्यगोगंगापुण्यनदीयतः ४६ ततोविमानमारुह्यचतुर्दंतसन्निभौ भोगेद्विजा
२४ लावण्याविरुभोगानमनोहरान् भुक्त्वाततःस्वर्गपुरंगमिष्यथनसंशयः ४७ तयोरितिवरंदत्वादिव्यरूपधरोव २४
रो महद्विमानमारूढोजगामतुस्त्रिदशालयं ४८ ततःपरंतुसंतुष्टौद्विजौलोजाह्नवींप्रति जग्मतुःस्तुलसीमेव
कीर्त्तयंतौकरिंतथा ४९ येचतुश्रीतुलसीगंधमाघ्रायंतिद्विजोत्तमाः तस्यवत्हृदयेविष्णुप्रकटीभवतिस्वयं ५०
एवंप्रभावासादेवितुलसीपुण्यदायिनी इमांतुतुलसीगाथांप्रातःकालेतुयःपठेत् ५१ सर्वेतेपितरस्त
स्ययास्यंतिपरमांगतिं ५२ इदंपवित्रंपरमंसर्वपापप्रनाशनं यःपठेच्छृणुयात्तस्यमीकोटिगोदानजंफलं
५३ इतिश्रीपद्मपुराणेतुलसीमाहात्म्यपंचदशोध्यायः १५ ॥ यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंम
या। यदिशुद्धमशुद्धंवाममदोषोनविद्यते ॥ ॥ ॥ श्लोक१७३०विलंबनामाब्देआश्वीनमासे
शुक्लपक्षेद्वितीया दशम्यांतिथौमंदवासरे इदंपुस्तकंदिनानाथपाठकेनलिखितंशुभंशुभंमस्तु ॥ ॥ ॥

[OrderDescription]
,CREATED=27.02.20 12:32
,TRANSFERRED=2020/02/27 at 12:39:17
,PAGES=51
,TYPE=STD
,NAME=S0002903
,Book Name=M-2680-TULSI MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,